श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये शारीरस्थानम्।

प्रथमः+अध्यायः।

अथ+अतः+ गर्भावक्रान्ति शारीरं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

शुद्धे शुक्रार्तवे सत्वः स्वकर्मक्लेशचोदितः।

गर्भः सम्पद्यते युक्तिवशात्+अग्निः+इव+अरणौ॥1॥

बीजात्मकैः+महाभूतैः सूक्ष्मैः सत्वानुगैः+च सः।

मातुः+च+आहाररसजैः क्रमात्+कुक्षौ विवर्द्धते॥2॥

तेजः+ यथा+अर्करश्मीनां स्फटिकेन तिरस्कृतम्।

न+इन्धनं दृश्यते गच्छत्+सत्वः+ गर्भाशयं तथा॥3॥

कारणानुविधायित्वात्+कार्याणां तत्स्वभावता।

नानायोन्याकृतीः सत्वः+ धत्ते+अतः+ द्रुतलोहवत्॥4॥

अतः+ एव च शुक्रस्य बाहुल्यात्+जायते पुमान्।

रक्तस्य स्त्री, तयोः साम्ये क्लीबः शुक्रार्तवे पुनः॥5॥

वायुना बहुशः+ भिन्ने यथास्वं बह्वपत्यता।

वियोनिविकृताकारा जायन्ते विकृतैः+मलैः॥6॥

मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।

वत्सरात्+द्वादशात्+ऊर्ध्वं याति पञ्चाशतः क्षयम्॥7॥

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता।

शुद्धे गर्भाशये मार्गे रक्ते शुक्रे+अनिले हृदि॥8॥

वीर्यवन्तं सुतं सूते ततः+ न्यूनाब्दयोः पुनः।

रोगी+अल्पायुः+अधन्यः+ वा गर्भा भवति न+एव वा॥9॥

वातादिकुणपग्रन्थिपूयक्षीणमलाह्वयम्।

बीजासमर्थं रेतोस्रं स्वलिङ्गैः+दोषजं वदेत्॥10॥

रक्तेन कुणपं, श्लेष्मवाताभ्यां ग्रन्थिसन्निभम्।

पूयाभं रक्तपित्ताभ्यां, क्षीणं मारुतपित्ततः॥11॥

कृच्छ्राणि+एतानि+असाध्यं तु त्रिदोषं मूत्रविट्प्रभम्।

कुर्यात्+वातादिभिः+दुष्टे स्वौषधम् कुणपे पुनः॥12॥

धातकीपुष्पखदिरदाडिमार्जुनसाधितम्।

पाययेत्+सर्पिः+अथवा विपक्वम्+असनादिभिः॥13॥

पलाशभस्माश्मभिदा ग्रन्थ्याभे पूयरेतसि।

परुषकवटादिभ्यां क्षीणे शुक्रकरी क्रिया॥14॥

संशुद्धः+ विट्प्रभे सर्पिः+हिङ्गुसेव्यादि(ग्नि)साधितम्।
पिबेत् ग्रन्थ्यार्तवे पाठाव्योषवृक्षकजं जलम्॥15॥
पेयं कुणपपूयास्रे चन्दनं वक्ष्यते तु यत्।
गुह्यरोगे च तत्+सर्वं कार्यं सोत्तरबस्तिकम्॥16॥
शुक्रं शुक्लं गुरुः+ स्निग्धं मधुरं बहलं बहु।?
घृतमाक्षिकतैलाभं सद्गर्भाय आर्तवं पुनः॥17॥
लाक्षारसशशास्राभं धौतं यत्+च विरज्यते।
शुद्धशुक्रार्तवं स्वस्थं संरक्तं मिथुनं मिथः॥18॥
स्नेहैः पुंसवनैः स्निग्धं शुद्धं शीलितबस्तिकम्।
नरं विशेषात्+क्षीराज्यैः+मधुरौषधसंस्कृतैः॥19॥
नारीं तैलेन माषैः+च पित्तलैः समुपाचरेत्।
क्षामप्रसन्नवदनां स्फूरच्छ्रोणिपयोधराम्॥20॥
स्वस्ताक्षिकुक्षिं पुंस्कामां विद्यात्+ऋतुमतीं स्त्रियम्।
पद्मं सङ्कोचम्+आयाति दिने+अतीते यथा, तथा॥21॥
ऋतौ+अतीते योनिः, सा शुक्रं न+अतः प्रतीच्छति।
मासेन+उपचितं रक्तं धमनीभ्याम्+ऋतौ पुनः॥22॥
ईषत्+कृष्णं विगन्धं च वायुः+योनिमुखात्+नुदेत्।
ततः पुष्पेक्षणात्+एव कल्याणध्यायिनी त्र्यहम्॥23॥
मृजालङ्काररहिता दर्भसंस्तरशायिनी।
क्षैरेयं यावकं स्तोकं कोष्ठशोधनकर्षणम्॥24॥
पर्णे शरावे हस्ते वा भुञ्जीत ब्रह्मचारिणी।
चतुर्थे+अह्नि ततः स्नाता शुक्लमाल्याम्बरा शुचिः॥25॥
इच्छन्ती भर्तृसदृशं पुत्रं पश्येत्+पुरः पतिम्।
ऋतुः+तु द्वादशनिशाः पूर्वाः+तिस्रः+अत्र निन्दिताः॥26॥
एकादशी च, युग्मासु स्यात्+पुत्रः+अन्यासु कन्यका।
उपाध्यायः+अथ पुत्रीयं कुर्वीत विधिवत्+विधिम्॥27॥
नमस्कारपरायाः+तु शूद्रायाः+ मन्त्रवर्जितम्।
अवन्ध्यः+ एवं संयोगः स्यात्+अपत्यं च कामतः॥28॥
सन्तः+ हि+आहुः+अपत्यार्थं दम्पत्योः सङ्गतिं रहः।
दुरपत्यं कुलाङ्गारः+ गोत्रे जातं महती+अपि॥29॥
इच्छेतां यादृशं पुत्रं तद्रूपचरितान्+च तौ।
चिन्तयेतां जनपदान्+तदाचारपरिच्छदौ॥30॥

कर्मान्ते च पुमान् सर्पिःक्षीरशाल्योदनाशितः।
प्राक्+दक्षिणेन पादेन शय्यां मौहूर्तिकाज्ञया॥31॥
आरोहेत् स्त्री तु वामेन तस्य दक्षिणपार्श्वतः।
तैलमाषोत्तराहारा तत्र मन्त्रं प्रयोजयेत्॥32॥
ॐआहिः+असि आयुरसि सर्वतः प्रतिष्ठासि धाता त्वां
दधातु विधाता त्वां दधातु ब्रह्मवर्चसा भवेति।
ब्रह्मा बृहस्पतिः+विष्णुः सोमः सूर्यः+तथा+अश्विनौ।
भगः+अथ मित्रावरूणौ वीरं ददतु मे सुतम्॥33॥
सान्त्वयित्वा ततः+अन्योन्यं संविशेतां मुदा+अन्वितौ।
उत्ताना तन्मनाः+ योषित्+तिष्ठेत्+अङ्गैः सुसंस्थितैः॥34॥
तथा हि बीजं गृह्णाति दोषैः स्वस्थानम्+आस्थितैः।
लिङ्गं तु सद्योगर्भाया योन्या बीजस्य सङ्ग्रहः॥35॥
तृप्तिः+गुरुत्वं स्फुरणं शुक्रास्रानुबन्धनम्।
हृदयस्पन्दनं तन्द्रा तृड्ग्लानिः+लोमहर्षणम्॥36॥
अव्यक्तः प्रथमे मासि सप्ताहात्+कललीभवेत्।
गर्भः पुंसवनानि+अत्र पूर्वं व्यक्तेः प्रयोजयेत्॥37॥
बली पुरुषकारः+ हि दैवम्+अपि+अतिवर्तते।
पुष्ये पुरुषकं हैमं राजतं वा+अथवा+आयसम्॥38॥
कृत्वा+अग्निवर्णं निर्वाप्य क्षीरे तस्य+अञ्जलिं पिबेत्।
गौरदण्डम्+अपामार्गं जीवकर्षभसैर्यकान्॥39॥
पिबेत्+पुष्ये जले पिष्टान्+एकद्वित्रिसमस्तशः।
क्षीरेण श्वेतबृहतीमूलं नासापुटे स्वयम्॥40॥
पुत्रार्थं दक्षिणे सिञ्चेत्+वामे दुहितृवाञ्छया।
पयसा लक्ष्मणामूलं पुत्रोत्पादस्थितिप्रदम्॥41॥
नासया+आस्येन वा पीतं वटशुङ्गाष्टकं तथा।
ओषधीः+जीवनीयाः+च बाह्यान्तः+उपयोजयेत्॥42॥
उपचारः प्रियहितैः+भर्त्रा भृत्यैः+च गर्भधृक्।
नवनीतघृतक्षीरैः सदा च+एनाम्+उपाचरेत्॥43॥
अतिव्यवायम्+आयासं भारं प्रावरणं गुरु।
अकालजागरस्वप्नं कठिनोत्कटकासनम्॥44॥
शोकक्रोधभयोद्वेगवेगश्रद्धाविधारणम्।
उपवासाध्वतीक्ष्णोष्णगुरुविष्टम्भिभोजनम्॥45॥

रक्तं निवसनं श्वभ्रकूपेक्षां मद्यम्+आमिषम्।
उत्तानशयनं यत्+च स्त्रियः+ न+इच्छन्ति तत्+त्यजेत्॥46॥
तथा रक्तस्रुतिं शुद्धिं बस्तिम्+आमासतः+अष्टमात्।
एभिः+गर्भः स्रवेदामः कुक्षौ शुष्येन्+म्रियेत वा॥47॥
वातलैः+च भवेत्+गर्भः कुब्जान्धजडवामनः।
पित्तलैः खलतिः पिङ्गः, श्वित्री पाण्डुः कफात्मभिः॥48॥
व्याधीन्+च+अस्या मृदुसुखैः+अतीक्ष्णैः+औषधैः+जयेत्।
द्वितीये मासि कललात्+घनः पेशी+अथवा+अर्बुदम्॥49॥
पुंस्त्रीक्लीबाः क्रमात्+तेभ्यः तत्र व्यक्तस्य लक्षणम्।
क्षामता गरिमा कुक्षेः+मूर्च्छा च्छर्दिः+अरोचकः॥50॥
जृम्भा प्रसेकः सदनं रोमराज्याः प्रकाशनम्।
अम्लेष्टता स्तनौ पीनौ सस्तन्यौ कृष्णचूचुकौ॥51॥
पादशोफः+ विदाहः+अन्ये श्रद्धाः+च विविधात्मिकाः।
मातृजं हि+अस्य हृदयं मातुः+च हृदयेन तत्॥52॥
सम्बद्धं तेन गर्भिण्या न+इष्टं श्रद्धाविमाननम्।
देयम्+अपि+अहितं तस्यै हितोपहितमल्पकम्॥53॥
श्रद्धाविघातात्+गर्भस्य विकृतिः+च्युतिः+एव वा।
व्यक्तीभवति मासे+अस्य तृतीये गात्रपञ्चकम्॥54॥
मूर्द्धा द्वे सक्थिनी बाहू सर्वसूक्ष्माङ्गजन्म च।
समम्+एव हि मूर्द्धाद्यैः+ज्ञानं च सुखदुःखयोः॥55॥
गर्भस्य नाभौ मातुः+च हृदि नाडी निबध्यते।
यया स पुष्टिम्+आप्नोति केदार इव कुल्यया॥56॥
चतुर्थे व्यक्तता+अङ्गानां, चेतनायाः+च पञ्चमे।
षष्ठे स्नायुसिरारोमबलवर्णनखत्वचाम्॥57॥
सर्वैः सर्वाङ्गसम्पूर्णः+ भावैः पुष्यति सप्तमे।
गर्भेण+उत्पीडिता दोषाः+तस्मिन् हृदयम्+आश्रिताः।
कण्डूं विदाहं कुर्वन्ति गर्भिण्याः किक्विसानि च॥58॥
नवनीतं हितं तत्र कोलाम्बुमधुरौषधैः।
सिद्धम्+अल्पपटुस्नेहं लघु स्वादु च भोजनम्॥59॥
चन्दनोशीरकल्केन लिम्पेदूरुस्तनोदरम्।
श्रेष्ठया वैणहरिणशशशोणितयुक्तया॥60॥
अश्वघ्नपत्रसिद्धेन तैलेन+अभ्यज्य मर्दयेत्।

पटोलनिम्बमञ्जिष्ठासुरसैः सेचयेत्+पुनः॥61॥

दार्वीमधुकतोयेन मृजां च परिशीलयेत्।

ओजः+अष्टमे सञ्चरति मातापुत्रौ मुहुः क्रमात्॥62॥

तेन तौ म्लानमुदितौ तत्र जातः+ न जीवति।

शिशुः+ओजोनवस्थानात्+नारी संशयिता भवेत्॥63॥

क्षीरपेया च पेया+अत्र सघृता+अन्वासनं घृतम्।

मधुरैः साधितं शुध्द्यै पुराणशकृतः+तथा॥64॥

शुष्कमूलककोलाम्लकषायेण प्रशस्यते।

शताह्वाकल्कितः+ बस्तिः सतैलघृतसैन्धवः॥65॥

तस्मिन्+तु+एकाहयाते+अपि कालः सूतेः+अतः परम्।

वर्षात्+विकारकारी स्यात्+कुक्षौ वातेन धारितः॥66॥

शस्तः+च नवमे मासि स्निग्धः+ मांसरसौदनः।

बहुस्नेहा यवागूः+वा पूर्वोक्तं च+अनुवासनम्॥67॥

तत एव पिचुं च+अस्या योनौ नित्यं निधापयेत्।

वातघ्नपत्रभङ्गाम्भः शीतं स्नाने+अन्वहं हितम्॥68॥

निःस्नेहाङ्गीं न नवमात्+मासात्+प्रभृति वासयेत्।

प्राग्दक्षिणस्तनस्तन्या पूर्वं तत्+पार्श्वचेष्टिनी॥69॥

पुन्नामदौर्हृदप्रश्नरता पुंस्वप्नदर्शिनी।

उन्नते दक्षिणे कुक्षौ गर्भे च परिमण्डले॥70॥

पुत्रं सूते+अन्यथा कन्यां या च+इच्छति नृसङ्गतिम्।

नृत्यवादित्रगान्धर्वगन्धमाल्यप्रिया च या॥71॥

क्लिबं तत्+सङ्करे, तत्र मध्यं कुक्षेः समुन्नतम्।

यमौ पार्श्वद्वयोन्नामात्+कुक्षौ द्रोण्याम्+इव स्थिते॥72॥

प्राक् च+एव नवमात्+मासात् सा सूतिगृहम्+आश्रयेत्।

देशे प्रशस्ते सम्भारैः सम्पन्नं साधके+अहनि॥73॥

तत्र+उदीक्षेत सा सूतिं सूतिकापरिवारिता।

अद्यश्वः प्रसवे ग्लानिः कुक्ष्यक्षिश्लथता क्लमः॥74॥

अधः+गुरुत्वम्+अरुचिः प्रसेकः+ बहुमूत्रता।

वेदना+ऊरूदरकटीपृष्ठहृद्बस्तिवङ्क्षणे॥75॥

योनिभेदरुजातोदस्फुरणस्रवणानि च।

आवीनाम्+अनु जन्म+अतः+ततः+ गर्भोदकस्रुतिः॥76॥

अथ+उपस्थितगर्भां तां कृतकौतुकमङ्गलाम्।

हस्तस्थपुन्नामफलां स्वभ्यक्तोष्णाम्बुसेचिताम्॥77॥
पाययेत्+सघृतां पेयां तनौ भूशयने स्थिताम्।
आभुग्नसक्थिम्+उत्तानाम्+अभ्यक्ताङ्गीं पुनः पुनः॥78॥
अधः+ नाभेः+विमृद्गीयात्+कारयेत्+जृम्भचङ्क्रमम्।
गर्भः प्रयाति+अवाक्+एवं, तल्लिङ्गं हृद्विमोक्षतः॥79॥
आविश्य जठरं गर्भः+ बस्तेः+उपरि तिष्ठति।
आव्यः+अभित्वरयन्ती+एनां खट्वाम्+आरोपयेत्+ततः॥80॥
अथ सम्पीडिते गर्भे योनिम्+अस्याः प्रसारयेत्।
मृदु पूर्वं प्रवाहेत बाढम्+अप्रसवात्+च सा॥81॥
हर्षयेत्+तां मुहुः पुत्रजन्मशब्दजलानिलैः।
प्रत्यायान्ति तथा प्राणाः सूतिक्लेशावसादिताः॥82॥
धूपयेत्+गर्भसङ्गे तु योनिं कृष्णाहिकञ्चुकैः।
हिरण्यपुष्पीमूलं च पाणिपादेन धारयेत्॥83॥
सुवर्चलां विशल्यां वा जराय्वपतने+अपि च।
कार्यम्+एतत्+तथा+उत्क्षिप्य बाह्वोः+एनां विकम्पयेत्॥84॥
कटीम्+आकोटयेत्+पार्ष्ण्या स्फिजौ गाढं निपीडयेत्।
तालुकण्ठं स्पृशेत्+वेण्या मूर्ध्नि दद्यात्+स्नुहीपयः॥85॥
भूर्जलाङ्गलिकीतुम्बीसर्पत्वक्कुष्ठसर्षपैः।
पृथक्+द्वाभ्यां समस्तैः+वा योनिलेपनधूपनम्॥86॥
कुष्ठतालीसकल्कं वा सुरामण्डेन पाययेत्।
यूषेण वा कुलत्थानां बाल्वजेनासवेन वा॥87॥
शताह्वासर्षपाजाजीशिग्रुतीक्ष्णकचित्रकैः।
सहिङ्गुकुष्ठमदनैः+मूत्रे क्षीरे च सार्षपम्॥88॥
तैलं सिद्धं हितं पायौ यः+अन्यां वा+अपि+अनुवासनम्।
शतपुष्पावचाकुष्ठकणासर्षपकल्कितः॥89॥
निरूहः पातयती+आशु सस्नेहलवणः+अपराम्।
तत्सङ्गे हि+अनिलः+ हेतुः सा निर्याति+आशु तज्जयात्॥90॥
कुशला पाणिना+अक्तेन हरेत्+क्लृप्तनखेन वा।
मुक्तगर्भापरां योनिं तैलेन+अङ्गं च मर्दयेत्॥91॥
मक्कल्लाख्ये शिरोबस्तिकोष्ठशूले तु पाययेत्।
सुचूर्णितं यवक्षारं घृतेन+उष्णजलेन वा॥92॥
धान्याम्बु वा गुडव्योषत्रिजातकरजोन्वितम्।

अथ बालोपचारेण बालं योषित्+उपाचरेत्॥93॥
सूतिका क्षुद्वती तैलात्+घृतात्+वा महतीं पिबेत्।
पञ्चकोलकिनीं मात्राम्+अनु च+उष्णं गुडोदकम्॥94॥
वातघ्नौषधतोयं वा, तथा वायुः+न कुप्यति।
विशुध्यति च दुष्टास्रं द्वित्रिरात्रमयं क्रमः॥95॥
स्नेहायोग्या तु निःस्नेहम्+अमुम्+एव विधिं भजेत्।
पीतवत्याः+च जठरं यमकाक्तं विवेष्टयेत्॥96॥
जीर्णे स्नाता पिबेत्+पेयां पूर्वोक्तौषधसाधिताम्।
त्र्यहात्+ऊर्ध्वं विदार्यादिवर्गक्वाथेन साधिता॥97॥
हिता यवागूः स्नेहाढ्या सात्म्यतः पयसा+अथवा।
सप्तरात्रात्+परं च+अस्यै क्रमशः+ बृंहणं हितम्॥98॥
द्वादशाहे+अनतिक्रान्ते पिशितं न+उपयोजयेत्।
यत्नेन+उपचरेत्+सूतां, दुःसाध्यः+ हि तदामयः॥99॥
गर्भवृद्धिप्रसवरुक्क्लेदास्रस्रुतिपीडनैः।
एवं च मासात्+अध्यर्धात्+मुक्ताहारादियन्त्रणा॥100॥
गतसूताभिधाना स्यात्+पुनरार्तवदर्शनात्॥100 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने गर्भावक्रान्तिः+नाम प्रथमः+अध्यायः॥1॥
द्वितीयः+अध्यायः
अथ+अतः+ गर्भव्यापदं शारीरं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
गर्भिण्याः परिहार्याणां सेवया रोगतः+अथ वा।
पुष्पे दृष्टे+अथवा शूले बाह्यान्तः स्निग्धशीतलम्॥1॥
सेव्याम्भोजहिमक्षीरिवल्ककल्काज्यलेपितान्।
धारयेत्+योनिबस्तिभ्याम्+आर्द्रार्द्रान् पिचुनक्तकान्॥2॥
शतधौतघृताक्तां स्त्री तदम्भसि+अवगाहयेत्।
ससिताक्षौद्रकुमुदकमलोत्पलकेसरम्॥3॥
लिह्यात् क्षीरघृतं खादेत्+शृङ्गाटककसेरुकम्।
पिबेत्+कान्ताब्जशालूकबालोदुम्बरवत्+पयः॥4॥
शृतेन शालिकाकोलीद्विबलामधुकेक्षुभिः।
पयसा रक्तशाल्यन्नम्+अद्यात्+समधुशर्करम्॥5॥
रसैः+वा जाङ्गलैः शुद्धिवर्जं च+अस्रोक्तम्+आचरेत्।

असम्पूर्णत्रिमासायाः प्रत्याख्याय प्रसाधयेत्॥6॥
आमान्वये च तत्र+इष्टं शीतं रूक्षोपसंहितम्।
उपवासः+ घनोशीरगुडूच्यरलुधान्यकाः॥7॥
दुरालभापर्पटकचन्दनातिविषाबलाः।
क्वथिताः सलिले पानं तृणधान्यानि भोजनम्॥8॥
मुद्गादियूषैः+आमे तु जिते स्निग्धादि पूर्ववत्।
गर्भे निपतिते तीक्ष्णे मद्यं सामर्थ्यतः पिबेत्॥9॥
गर्भकोष्ठविशुध्द्यर्थम्+अर्तिविस्मरणाय च।
लघुना पञ्चमूलेन रूक्षां पेयां ततः पिबेत्॥10॥
पेयाम्+अमद्यपा कल्के साधितां पाञ्चकौलिके।
बिल्वादिपञ्चकक्वाथे तिलोद्दालकतण्डुलैः॥11॥
मासतुल्यदिनानि+एवं पेयादिः पतिते क्रमः।
लघुः+अस्नेहलवणः+ दीपनीययुतः+ हितः॥12॥
दोषधातुपरिक्लेदशोषार्थं विधिः+इति+अयम्।
स्नेहान्नबस्तयः+च+उर्ध्वं बल्यदीपनजीवनाः॥13॥
सञ्जातसारे महति गर्भे योनिपरिस्रवात्।
वृद्धिम्+अप्राप्नुवन् गर्भः कोष्ठे तिष्ठति सस्फुरः॥14॥
उपविष्टकम्+आहुः+तं, वर्द्धते तेन न+उदरम्।
शोकोपवासरूक्षाद्यैः+अथवा योन्यतिस्रवात्॥15॥
वाते क्रुद्धे कृशः शुष्येत्+गर्भः+ नागोदरं तु तम्।
उदरं वृद्धम्+अपि+अत्र हीयते स्फुरणं चिरात्॥16॥
तयोः+बृंहणवातघ्नमधुरद्रव्यसंस्कृतैः।
घृतक्षीररसैः+तृप्तिः+आमगर्भाः+च खादयेत्॥17॥
तैः+एव च सुभिक्षायाः क्षोभणं यानवाहनैः।
लीनाख्ये निस्फुरेत् श्येनगोमत्स्योत्क्रोशबर्हिजाः॥18॥
रसा बहुघृतां देयां माषमूलकजा अपि।
बालबिल्वं तिलान्+माषान्+सक्तून्+च पयसा पिबेत्॥19॥
समेद्यमांसं मधु वा कट्यभ्यङ्गं च शीलयेत्।
हर्षयेत्+सततं च+एनाम्+एवं गर्भः प्रवर्द्धते॥20॥
पुष्टः+अन्यथा वर्षगणैः कृच्छ्रात्+जायेत, न+एव वा।
उदावर्तं तु गर्भिण्याः स्नेहैः+आशुतरां जयेत्॥21॥
योग्यैः+च बस्तिभिः+हन्यात्+सगर्भां स हि गर्भिणीम्।

गर्भे+अतिदोषोपचयादपथ्यैः+दैवतः+अपि वा॥22॥
मृते+अन्तरुदरं शीतं स्तब्धं ध्मातं भृशव्यथम्।
गर्भास्पन्दः+ भ्रमतृष्णा कृच्छ्रात्+उच्छ्वसनं क्लमः॥23॥
अरतिः स्रस्तनेत्रत्वम्+आवीनाम्+असमुद्भवः।
तस्याः कोष्णाम्बुसिक्तायाः पिष्ट्वा योनिं प्रलेपयेत्॥24॥
गुडं किण्वं सलवणं तथा+अन्तः पूरयेत्+मुहुः।
घृतेन कल्कीकृतया शाल्मल्यतसिपिच्छया॥25॥
मन्त्रैः+योगैः+जरायूक्तैः+मूढगर्भः+ न चेत्+पतेत्।
अथ+अपृच्छय+ईश्वरं वैद्यः+ यत्नेन+आशु तम्+आहरेत्॥26॥
हस्तम्+अभ्यज्य योनिं च साज्यशाल्मलिपिच्छया।
हस्तेन शक्यं तेन+एव गात्रं च विषमं स्थितम्॥27॥
आञ्छनोत्पीडसम्पीडविक्षेपोत्क्षेपणादिभिः।
आनुलोम्य समाकर्षेत्+योनिं प्रति+आर्जवागतम्॥28॥
हस्तपादशिरोभिः+यः+ योनिं भुग्नः प्रपद्यते।
पादेन योनिम्+एकेन भुग्नः+अन्येन गुदं च यः॥29॥
विष्कम्भौ नाम तौ मूढौ शस्त्रदारणम्+अर्हतः।
मण्डलाङ्गुलिशस्त्राभ्यां तत्र कर्म प्रशस्यते॥30॥
वृद्धिपत्रं हि तीक्ष्णाग्रं न योनौ+अवचारयेत्।
पूर्वं शिरःकपालानि दारयित्वा विशोधयेत्॥31॥
कक्षोरस्तालुचिबुकप्रदेशे+अन्यतमे ततः।
समालम्ब्य दृढं कर्षेत्+कुशलः+ गर्भशङ्कुना॥32॥
अभिन्नशिरसं तु+अक्षिकूटयोः+गण्डयोः+अपि।
बाहुं छित्त्वा+अससक्तस्य वाताध्मातोदरस्य तु॥33॥
विदार्य कोष्ठमन्त्राणि बहिः+वा सन्निरस्य च।
कटीसक्तस्य तद्वत्+च तत्+कपालानि दारयेत्॥34॥
यत्+यत्+वायुवशात्+अङ्गं सज्जेत्+गर्भस्य खण्डशः।
तत्+तत्+छित्त्वा+आहरेत्+सम्यक्+रक्षेत्+नारीं च यत्नतः॥35॥
गर्भस्य हि गतिं चित्रां करोति विगुणः+अनिलः।
तत्र+अनल्पमतिः+तस्मात्+अवस्थापेक्षम्+आचरेत्॥36॥
छिन्द्यात्+गर्भं न जीवन्तं मातरं स हि मारयेत्।
सहात्मना, न च+उपेक्ष्यः क्षणम्+अपि+अस्तजीवितः॥37॥
योनिसंवरणभ्रंशमक्कल्लश्वासपीडिताम्।

पूत्युद्गारां हिमाङ्गीं च मूढगर्भां परित्यजेत्॥38॥
अथ+अपतन्तीम्+अपरां पातयेत्+पूर्ववत्+भिषक्।
एवं निर्हृतशल्यां तु सिञ्चेत्+उष्णेन वारिणा॥39॥
दद्यात्+अभ्यक्तदेहायै योनौ स्नेहपिचुं ततः।
योनिः+मृदुर्भवेत्+तेन शूलं च+अस्याः प्रशाम्यति॥40॥
दीप्यकातिविषारास्नाहिङ्ग्वेलापञ्चकोलकात्।
चूर्णं स्नेहेन कल्कं वा क्वाथं वा पाययेत्+ततः॥41॥
कटुकातिविषापाठाशाकत्वग्घिङ्गुतेजिनीः।
तद्वत्+च दोषस्यन्दार्थं वेदनोपशमाय च॥42॥
त्रिरात्रम्+एवं, सप्ताहं स्नेहम्+एव ततः पिबेत्।
सायं पिबेत्+अरिष्टं च तथा सुकृतम्+आसवम्॥43॥
शिरीषककुभक्वाथपिचून् योनौ विनिक्षिपेत्।
उपद्रवाः+च ये+अन्ये स्युः+तान् यथास्वम्+उपाचरेत्॥44॥
पयः+ वातहरैः सिद्धं दशाहं भोजने हितम्।
रसः+ दशाहं च परं लघुपथ्याल्पभोजना॥45॥
स्वेदाभ्यङ्गपरा स्नेहान् बलातैलादिकान् भजेत्।
ऊर्ध्वं चतुर्भ्यः+ मासेभ्यः सा क्रमेण सुखानि च॥46॥
बलामूलकषायस्य भागाः षट् पयसः+तथा।
यवकोलकुलत्थानां दशमूलस्य च+एकतः॥47॥
निष्क्वाथभागः+ भागः+च तैलस्य तु चतुर्दशः।
द्विमेदादारुमञ्जिष्ठाकाकोलीद्वयचन्दनैः॥48॥
सारिवाकुष्ठतगरजीवकर्षभसैन्धवैः।
कालानुसार्याशैलेयवचागुरुपुनर्नवैः॥49॥
अश्वगन्धावरीक्षीरशुक्लायष्टीवरारसैः।
शताह्वाशूर्पपर्ण्येलात्वक्पत्रैः श्लक्ष्णकल्कितैः॥50॥
पक्वं मृद्वग्निना तैलं सर्ववातविकारजित्।
सूतिकाबालमर्मास्थिहतक्षीणेषु पूजितम्॥51॥
ज्वरगुल्मग्रहोन्मादमूत्राघातान्त्रवृद्धिजित्।
धन्वन्तरेः+अभिमतं योनिरोगक्षयापहम्॥52॥
बस्तिद्वारे विपन्नायाः कुक्षिः प्रस्पन्दते यदि।
जन्मकाले ततः शीघ्रं पाटयित्वा+उद्धरेत्+शिशुम्॥53॥
मधुकं शाकबीजं च पयस्या सुरदारु च।

अश्मन्तकः कृष्णतिलाः+ताम्रवल्ली शतावरी॥54॥
वृक्षादनी पयस्या च लता सा+उत्पलसारिवा।
अनन्ता सारिवा रास्ना पद्मा च मधुयष्टिका॥55॥
बृहतीद्वयकाश्मर्यक्षीरिशुङ्गत्वचा घृतम्।
पृश्निपर्णी बला शिग्रुः श्वदंष्ट्रा मधुपर्णिका॥56॥
शृङ्गाटकं बिसं द्राक्षा कसेरु मधुकं सिता।
सप्त+एतान् पयसा योगान्+अर्द्धश्लोकसमापनान्॥57॥
क्रमात्+सप्तसु मासेषु गर्भे स्रवति योजयेत्।
कपित्थबिल्वबृहतीपटोलेक्षुनिदिग्धिकात्॥58॥
मूलैः शृतं प्रयुञ्जीत क्षीरं मासे तथा+अष्टमे।
नवमे सारिवानन्तापयस्यामधुयष्टिभिः॥59॥
योजयेत्+दशमे मासि सिद्धं क्षीरं पयस्यया।
अथवा यष्टिमधुकनागरामरदारुभिः॥60॥
अवस्थितं लोहितम्+अङ्गनायाः वातेन गर्भं ब्रुवते+अनभिज्ञाः।
गर्भाकृतित्वात्+कटुकोष्णतीक्ष्णैः स्रुते पुनः केवलः+ एव रक्ते॥61॥
गर्भं जडा भूतहृतं वदन्ति मूर्तेः+न दृष्टं हरणं यतः+तैः।
ओजोशनत्वात्+अथवा+अव्यवस्थैः+भूतैः+उपेक्ष्येत न गर्भमाता॥62॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने गर्भव्यापत्+नाम द्वितीयः+अध्यायः॥2॥
तृतीयः+अध्यायः।
अथ+अतः+अङ्गविभागं शारीरं व्याख्यास्मामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
शिरः+अन्तराधिः+द्वौ बाहू सक्थिनी+इति समासतः।
षडङ्गमि+अङ्गं प्रत्यङ्गं तस्य+अक्षिहृदयादिकम्॥1॥
शब्दः स्पर्शः+च रूपं च रसः+ गन्धः क्रमात्+गुणाः।
खानिलाग्न्यब्भुवाम् एकगुणवृध्द्यन्वयः परे॥2॥
तत्र खात् खानि देहे+अस्मिन् श्रोत्रं शब्दः+ विविक्तता।
वातात्+स्पर्शत्वगुच्छ्वासा वह्नेः+दृग्रूपपक्तयः॥3॥
आप्याः+ जिह्वारसक्लेदाः+ घ्राणगन्धास्थि पार्थिवम्।
मृदु+अत्र मातृजं रक्तमांसमज्जगुदादिकम्॥4॥
पैतृकं तु स्थिरं शुक्रधमन्यस्थिकचादिकम्।
चैतनं चित्तम्+अक्षाणि नानायोनिषु जन्म च॥5॥

सात्म्यजं तु+आयुः+आरारोग्यम्+अनालस्यं प्रभा बलम्।
रसजं वपुषः+ जन्म वृत्तिः+वृद्धिः+अलोलता॥6॥
सात्विकं शौचम्+आस्तिक्यं शुक्लधर्मरुचिः+मतिः।
राजसं बहुभाषित्वं मानक्रुद्दम्भमत्सरम्॥7॥
तामसं भयम्+अज्ञानं निद्रा+आलस्यं विषादिता।
इति भूतमयः+ देहः तत्र सप्त त्वचः+असृजः॥8॥
पच्यमानात्+प्रजायन्ते क्षीरात्+सन्तानिका इव।
धात्वाशयान्तरक्लेदः+ विपक्वः स्वं स्वम्+ऊष्मणा॥9॥
श्लेष्मस्नाय्वपराच्छन्नः कलाख्यः काष्ठसारवत्।
ताः सप्त सप्त च+आधारा रक्तस्य+आद्यः क्रमात् परे॥10॥
कफामपित्तपक्वानां वायोः+मूत्रस्य च स्मृताः।
गर्भाशयः+अष्टमः स्त्रीणां पित्तपक्वाशयान्तरे॥11॥
कोष्ठाङ्गानि स्थितानि+एषु हृदयं क्लोमः फुप्फुसम्।
यकृत्प्लीहोन्दुकं वृक्कौ नाभिडिम्भान्त्रबस्तयः॥12॥
दश जीवितधामानि शिरोरसनबन्धनम्।
कण्ठः+अस्रं हृदयं नाभिः+बस्तिः शुक्रौजसी गुदम्॥13॥
जालानि कण्डराः+च+अङ्गे पृथक् षोडश निर्दिशेत्।
षट् कूर्चाः सप्त सीवन्यः+ मेढ्रजिह्वाशिरोगताः॥14॥
शस्त्रेण ताः परिहरेत्+चतस्रः+ मांसरज्जवः।
चतुर्दशास्थिसङ्घाताः, सीमन्ताः+ द्विगुणाः+ नव॥15॥
अस्थ्नां शतानि षष्टिः+च त्रीणि दन्तनखैः सह।
धन्वन्तरिः+तु त्रीणि+आह, सन्धीनां च शतद्वयम्॥16॥
दशोत्तरं सहस्रे द्वे निजगादात्रिनन्दनः।
स्नाय्वां नवशती पञ्च पुंसां पेशीशतानि तु॥17॥
अधिका विंशतिः स्त्रीणां योनिस्तनसमाश्रिताः।
दश मूलसिरा हृत्स्थाः+ताः सर्वं सर्वतः+ वपुः॥18॥
रसात्मकं वहन्ति+ओजः+तन्निबद्धं हि चेष्टितम्।
स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत्॥19॥
भिद्यन्ते ताः+ततः सप्तशतानि+आसां भवन्ति तु।
तत्र+एकैकं च शाखायां शतं, तस्मिन्+न वेधयेत्॥20॥
सिरां जालन्धरां नाम तिस्रः+च+अभ्यन्तराश्रिताः।
षोडशद्विगुणाः श्रोण्यां, तासां द्वे द्वे तु वङ्क्षणे॥21॥

द्वे द्वे कटिकतरुणे शस्त्रेण+अष्टौ स्पृशेत्+न ताः।
पार्श्वयोः षोडश+एकैकाम्+ऊर्ध्वगां वर्जयेत्+तयोः॥22॥
द्वादशद्विगुणाः पृष्ठे पृष्ठवंशस्य पार्श्वयोः।
द्वे द्वे तत्र+ऊर्ध्वगामिन्यौ न शस्त्रेण परामृशेत्॥23॥
पृष्ठवत्+जठरे तासां मेहनस्य+उपरि स्थिते।
रोमराजीम्+उभयतः+ द्वे द्वे शस्त्रेण न स्पृशेत्॥24॥
चत्वारिंशत्+उरसि+आसां चतुर्दश न वेधयेत्।
स्तनरोहिततन्मूलहृदये तु पृथक्+द्वयम्॥25॥
अपस्तम्भाख्ययोः+एकां तथा+अपालापयोः+अपि।
ग्रीवायां पृष्ठवत्+तासां नीले मन्ये कृकाटिके॥26॥
विधुरे मातृकाः+च+अष्टौ षोडश+इति परित्यजेत्।
हन्वोः षोडश, तासां द्वे सन्धिबन्धनकर्मणी॥27॥
जिह्वायां हनुवत्+तासाम्+अधः+ द्वे रसबोधने।
द्वे च वाचः प्रवर्तिन्यौ नासायां चतुरुत्तरा॥28॥
विंशतिः+गन्धवेदिन्यौ तासाम्+एकां च तालुगाम्।
षट्पञ्चाशत्+नयनयोः+निमेषोन्मेषकर्मणी॥29॥
द्वे द्वे, अपाङ्गयोः+द्वे च तासां षट्+इति वर्जयेत्।
नासानेत्राश्रिताः षष्टिः+ललाटो, स्थपनीश्रिताम्॥30॥
तत्र+एकां, द्वे तथा+आवर्तौ, चतस्रः+च कचान्तगाः।
सप्त+एवं वर्जयेत्+तासाम् कर्णयोः षोडश+अत्र तु॥31॥
द्वे शब्दबोधने शङ्खौ सिराः+ता एव च+आश्रिताः।
द्वे शङ्खसन्धिगे तासाम् मूर्ध्नि द्वादश तत्र तु॥32॥
एकैकां पृथक्+उत्क्षेपसीमन्ताधिपतिस्थिताम्।
इति+अवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः॥33॥
अवेध्याः+तत्र कात्स्न्र्येन देहे+अष्टान्+अवतिः+तथा।
सङ्कीर्णा ग्रथिताः क्षुद्रा वक्राः सन्धिषु च+आश्रिताः॥34॥
तासां शतानां सप्तानां पादः+अस्रं वहते पृथक्।
वातपित्तकफैः+जुष्टं शुद्धं च+एवं स्थिता मलाः॥35॥
शरीरम्+अनुगृह्णन्ति पीडयन्ति+अन्यथा पुनः।
तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात्+सिराः॥36॥
प्रस्पन्दिन्यः+च वातास्रं वहन्ते पित्तशोणितम्।
स्पर्शोष्णाः शीघ्रवाहिन्यः+ नीलपीताः कफं पुनः॥।37॥

गौर्यः स्निग्धाः स्थिराः शीताः संसृष्टं लिङ्गसङ्करे।
गूढाः समस्थिताः स्निग्धा रोहिण्यः शुद्धशोणितम्॥38॥
धमन्यः+ नाभिसम्बद्धाः+ विंशतिः+चतुरुत्तरा।
ताभिः परिवृता नाभिः+चक्रनाभिः+इव+आरकैः॥39॥
ताभिः+च+उर्ध्वम्+अधः+तिर्यक्+देहः+अयम्+अनुगृह्यते।
स्रोतांसि नासिके कर्णौ नेत्रे पाय्वास्यमेहनम्॥40॥
स्तनौ रक्तपथः+च+इति नारीणाम्+अधिकं त्रयम्।
जीवितायतनानि+अन्तः स्रोतांसि+आहुः+त्रयोदश॥41॥
प्राणधातुमलाम्भोन्नवाहीनि अहितसेवनात्।
तानि दुष्टानि रोगाय, विशुद्धानि सुखाय च॥42॥
स्वधातुसमवर्णानि वृत्तस्थूलानि+अणूनि च।
स्रोतांसि दीर्घाणि+आकृत्या प्रतानसदृशानि च॥43॥
आहारः+च विहारः+च यः स्यात्+दोषगुणैः समः।
धातुभिः+विगुणः+ यः+च स्रोतसां स प्रदूषकः॥44॥
अतिप्रवृत्तिः सङ्गः+ वा सिराणां ग्रन्थयः+अपि वा।
विमार्गतः+ वा गमनं स्रोतसां दुष्टिलक्षणम्॥45॥
बिसानाम्+इवम् सूक्ष्माणि दूरं प्रविसृतानि च।
द्वाराणि स्रोतसां देहे रसः+ यैः+उपचीयते॥46॥
व्यधे तु स्रोतसां मोहकम्पाध्मानवमिज्वराः।
प्रलापशूलविण्मूत्ररोधा मरणम्+एव वा॥47॥
स्रोतोविद्धमतः+ वैद्यः प्रत्याख्याय प्रसाधयेत्।
उद्धृत्य शल्यं यत्नेन सद्यः क्षतविधानतः॥48॥
अन्नस्य पक्ता पित्तं तु पाचकाख्यं पुरा+ईरितम्।
दोषधातुमलादीनाम्+ऊष्मा+इति+आत्रेयशासनम्॥49॥
तदधिष्ठानम्+अन्नस्य ग्रहणात्+ग्रहणी मता।
सा+एव धन्वन्तरिमते कला पित्तधराह्वया॥50॥
आयुरारोग्यवीर्यौजोभूतधात्वग्निपुष्टये।
स्थिता पक्वाशयद्वारिं भुक्तमार्गार्गला+इव सा॥51॥
भुक्तम्+आमाशये रुध्वा सा विपाच्य नयति+अधः।
बलवती+अबला तु+अन्नम्+आमम्+एव विमुञ्चति॥52॥
ग्रहण्या बलम्+अग्निः+हि स च+अपि ग्रहणीबलः।
दूषिते+अग्नौ+अतः+ दुष्टा ग्रहणी रोगकारिणी॥53॥

यत्+अन्नं देहधात्वोजोबलवर्णादिपोषणम्।
तत्र+अग्निः+हेतुः+आहारात्+न हि+अपक्वात्+रसादयः॥54॥
अन्नं काले+अभ्यवहृतं कोष्ठं प्राणानिलाहृतम्।
द्रवैः+विभिन्नसङ्घातं नीतं स्नेहेन मार्दवम्॥55॥
सन्धुक्षितः समानेन पचति+आमाशयस्थितम्।
औदर्यः+अग्निः+यथा बाह्यः स्थालीस्थं तोयतण्डुलम्॥56॥
आदौ षड्रसम्+अपि+अन्नं मधुरीभूतम्+ईरयेत्।
फेनीभूतं कफं, यातं विदाहात्+अम्लतां ततः॥57॥
पित्तम्+आमाशयात्+कुर्यात्+च्यवमानं, च्युतं पुनः।
अग्निना शोषितं पक्वं पिण्डितं कटु मारुतम्॥58॥
भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः।
पञ्चाहारगुणान्+स्वान् स्वान् पार्थिवादीन् पचन्ति+अनु॥59॥
यथास्वं ते च पुष्णन्ति पक्वा भूतगुणान् पृथक्।
पार्थिवाः पार्थिवान्+एव शेषाः शेषान्+च देहगान्॥60॥
किट्टं सारः+च तत्+पक्वम्+अन्नं सम्भवति द्विधा।
तत्र+अच्छं किट्टम्+अन्नस्य मूत्रं विद्यात्+घनं शकृत्॥61॥
सारः+तु सप्तभिः+भूयः+ यथास्वं पच्यते+अग्निभिः।
रसात्+रक्तं ततः+ मांसं मांसात्+मेदः+ततः+अस्थि च॥62॥
अस्थ्नः+ मज्जा ततः शुक्रं शुक्रात्+गर्भः प्रजायते।
कफः पित्तं मलाः खेषु प्रस्वेदः+ नखरोम च॥63॥
स्नेहः+अक्षित्वग्विशाम्+ओजः+ धातूनां क्रमशः+ मलाः।
प्रसादकिट्टौ धातूनां पाकात्+एवं द्विधा+ऋच्छतः॥64॥
परस्परोपसंस्तम्भाद्+धातुस्नेहपरम्परा।
केचित्+आहुः+अहोरात्रात्+षडहात्+अपरे, परे॥65॥
मासेन याति शुक्रत्वम्+अन्नं पाकक्रमादिभिः।
सन्तता भोज्यधातूनां परिवृत्तिः+तु चक्रवत्॥66॥
वृष्यादीनि प्रभावेण सद्यः शुक्रादि कुर्वते।
प्रायः करोति+अहोरात्रात्+कर्म+अन्यत्+अपि भेषजम्॥67॥
व्यानेन रसधातुः+हि विक्षेपोचितकर्मणा।
युगपत्+सर्वतः+अजस्रं देहे विक्षिप्यते सदा॥68॥
क्षिप्यमाणः खवैगुण्यात्+रसः सज्जति यत्र सः।
तस्मिन्+विकारं कुरुते खे वर्षम्+इव तोयदः॥69॥

दोषाणाम्+अपि च+एवं स्यात्+एकदेशप्रकोपणम्।
अन्नभौतिकधात्वग्निकर्म+इति परिभाषितम्॥70॥
अन्नस्य पक्ता सर्वेषां पक्तॄणाम्+अधिकः+ मतः।
तन्मूलाः+ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः॥71॥
तस्मात्+तं विधिवत्+युक्तैः+अन्नपानेन्धनैः+हितैः।
पालयेत्+प्रयतः+तस्य स्थितौ हि+आयुर्बलस्थितिः॥72॥
समः समाने स्थानस्थे विषमः+अग्निः+विमार्गगे।
पित्ताभिमूर्च्छिते तीक्ष्णः+ मन्दः+अस्मिन्+कफपीडिते॥73॥
समः+अग्निः+विषमः+तीक्ष्णः+ मन्दः+च+एवं चतुर्विधः।
यः पचेत्+सम्यक्+एव+अन्नं भुक्तं सम्यक् समः+तु+असौ॥74॥
विषमः+असम्यक्+अपि+आशु सम्यगक्+वा+अपि चिरात्+पचेत्।
तीक्ष्णः+ वह्निः पचेत्+शीघ्रम्+असम्यक्+अपि भोजनम्॥75॥
मन्दः+तु सम्यक्+अपि+अन्नम्+उपयुक्तं चिरात्+पचेत्।
कृत्वा+आस्यशोषाटोपान्त्रकूजनाध्मानगौरवम्॥76॥
सहजं कालजं युक्तिकृतं देहबलं त्रिधा।
तत्र सत्त्वशरीरोत्थं प्राकृतं सहजं बलम्॥77॥
वयस्कृतम्+ऋतूत्थं च कालजं, युक्तिजं पुनः।
विहाराहारजनितं तथा+ऊर्जस्करयोगजम्॥78॥
देशः+अल्पवारिद्रुनगः+ जाङ्गलः स्वल्परोगदः।
आनूपः+ विपरीतः+अस्मात्+समः साधारणः स्मृतः॥79॥
मज्जमेदोवसामूत्रपित्तश्लेष्मशकृन्ती+असृक्।
रसः+ जलं च देहे+अस्मिन्+एकैकाञ्जलिवर्द्धितम्॥80॥
पृथक् स्वप्रसृतं प्रोक्तम्+ओजोमस्तिष्करेतसाम्।
द्वौ+अञ्जली तु स्तन्यस्य चत्वारः+ रजसः स्त्रियाः॥81॥
समधातोः+इदं मानं विद्यात्+वृद्धिक्षयावतः॥82॥
शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयर्तुषु।
यः स्यात्+दोषः+अधिकः+तेन प्रकृतिः सप्तधा+उदिता॥83॥
विभुत्वात्+आशुकारित्वात्+बलित्वात्+अन्यकोपनात्।
स्वातन्त्र्यात्+बहुरोगत्वात्+दोषाणां प्रबलः+अनिलः॥84॥
प्रायः+अतः+ एव पवनाध्युषिता मनुष्या दोषात्मकाः स्फुटितधूसरकेशगात्राः।
शीतद्विषः+चलधृतिस्मृतिबुद्धिचेष्टासौहार्ददृष्टिगतयः+अतिबहुप्रलापाः॥85॥
अल्पवित्तबलजीवितनिद्राः सन्नसक्तचलजर्जरवाचः।

नास्तिकाः+ बहुभुजः सविलासा गीतहासमृगयाकलिलोलाः॥86॥
मधुराम्लपटूष्णसात्म्यकाङ्क्षाः कृशदीर्घाकृतयः सशब्दयाताः।
न दृढा न जितेन्द्रिया न च+आर्या न च कान्तादयिता बहुप्रजा वा॥87॥
नेत्राणि च+एषां खरधूसराणि वृत्तानि+अचारूणि मृतोपमानि।
उन्मीलितानी+इव भवन्ति सुप्ते शैलद्रुमान्+ते गगनं च यान्ति॥88॥
अधन्या मत्सराध्माताः स्तेनाः प्रोद्बद्धपिण्डिकाः।
श्वशृगालोष्ट्रगृध्राखुकाकानूकाः+च वातिकाः॥89॥
पित्तं वह्निः+वह्निजं वा यत्+अस्मात्+पित्तोद्रिक्तः+तीक्ष्णतृष्णाबुभुक्षः।
गौरोष्णाङ्गः+ताम्रहस्ताङ्घ्रिवक्त्रः शूरः+ मानी पिङ्गकेशः+अल्परोमा॥90॥
दयितमाल्यविलेपनमण्डनः सुचरितः शुचिः+आश्रितवत्सलः।
विभवसाहसबुद्धिबलान्वितः+ भवति भीषु गतिः+द्विषताम्+अपि॥91॥
मेधावी प्रशिथिलसन्धिबन्धमांसः+ नारीणाम्+अनभिमतः+अल्पशुक्रकामः।
आवासः पलिततरङ्गनीलिकानां भुङ्क्ते+अन्नं मधुरकषायतिक्तशीतम्॥92॥
घर्मद्वेषी स्वेदनः पूतिगन्धिः+भूरि+उच्चारक्रोधपानाशनेर्ष्यः।
सुप्तः पश्येत्+कर्णिकारान्+पलाशान् दिग्दाहोल्काविद्युदर्कानलान्+च॥93॥
तनूनि पिङ्गानि चलानि च+एषां तन्वल्पपक्ष्माणि हिमप्रियाणि।
क्रोधेन मद्येन रवेः+च भासा रागं व्रजन्ति+आशु विलोचनानि॥94॥
मध्यायुषः+ मध्यबलाः पण्डिताः क्लेशभीरवः।
व्याघ्रर्क्षकपिमार्जारयक्षानूकाः+च पैत्तिकाः॥95॥
श्लेष्मा सोमः श्लेष्मलः+तेन सौम्यः+ गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः।
क्षुत्तृड्दुःखक्लेशघर्मैः+अतप्तः+ बुद्ध्या युक्तः सात्विकः सत्यसन्धः॥96॥
प्रियङ्गुदूर्वाशरकाण्डशस्त्रगोरोचनापद्मसुवर्णवर्णः।
प्रलम्बबाहुः पृथुपीनवक्षा महाललाटः+ घननीलकेशः॥97॥
मृद्वङ्गः समसुविभक्तचारुदेहः+ बह्वोजोरतिरसशुक्रपुत्रभृत्यः।
धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति दृढं चिरं च वैरम्॥98॥
समदद्विरदेन्द्रतुल्ययातः+ जलदाम्भोधिमृदङ्गसिंहघोषः।
स्मृतिमान्+अभियोगवान् विनीतः+ न च बाल्ये+अपि+अतिरोदनः+ न लोलः॥99॥
तिक्तं कषायं कटुकोष्णरुक्षम्+अल्पं स भुङ्क्ते बलवान्+तथा+अपि।
रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः॥100॥
अल्पव्याहारक्रोधपानाशनेहः प्राज्यायुर्वित्तः+ दीर्घदर्शी वदान्यः।
श्राद्धः+ गम्भीरः स्थूललक्षः क्षमावान्+आर्यः+ निद्रालुः+दीर्घसूत्रः कृतज्ञः॥101॥
ऋजुः+विपश्चित्+सुभगः सुलज्जः+ भक्तः+ गुरूणां स्थिरसौहृदः+च।

स्वप्ने सपद्मान्+सविहङ्गमालान्+तोयाशयान् पश्यति तोयदान्+च॥102॥

ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः।

श्लेष्मप्रकृतयः+तुल्याः+तथा सिंहाश्वगोवृषैः॥103॥

प्रकृतीः+द्वयसर्वोत्थाः+ द्वन्द्वसर्वगुणोदये।

शौचास्तिक्यादिभिः+च+एवं गुणैः+गुणमयीः+वदेत्॥104॥

वयः+तु+आषोडशात्+बालं तत्र धात्विन्द्रियौजसाम्।

वृद्धिः+आसप्ततेः+मध्यं तत्रावृद्धिः परं क्षयः॥105॥

स्वं स्वं हस्तत्रयं सार्द्धं वपुः पात्रं सुखायुषोः।

न च यदि+उक्तम्+उद्रिक्तैः+अष्टाभिः+निन्दितैः+निजैः॥106॥

अरोमशासितस्थूलदीर्घत्वैः सविपर्ययैः।

सुस्निग्धा मृदवः सूक्ष्मा न+एकमूला स्थिराः कचाः॥107॥

ललाटम्+उन्नतं श्लिष्टशङ्खमर्धेन्दुसन्निभम्।

कर्णौ नीचोन्नतौ पश्चात्+महान्तौ श्लिष्टमांसलौ॥108॥

नेत्रः+ व्यक्तासितसिते सुबद्धघनपक्ष्मणी।

उन्नताग्रा महोच्छ्वासा पीनर्जुर्नासिका समा॥109॥

ओष्ठौ रक्तौ+अनुद्वृत्तौ, महत्यौ न+उल्बणे हनू।

महत्+आस्यं, घना दन्ताः स्निग्धाः श्लक्ष्णाः सिताः समाः॥110॥

जिह्वा रक्ता+आयता तन्वी, मांसलं चिबुकं महत्।

ग्रीवा ह्रस्वा घना वृत्ता, स्कन्धौ+उन्नतपीवरौ॥111॥

उदरं दक्षिणावर्तगूढनाभि समुन्नतम्।

तनुरक्तोन्नतनखं स्निग्धम्+आताम्रमांसलम्॥112॥

दीर्घाच्छिद्राङ्गुलि महत्+पाणिपादं प्रतिष्ठितम्।

गूढवंशं बृहत्+पृष्ठं, निगूढाः सन्धयः+ दृढाः॥113॥

धीरः स्वरः+अनुनादी च, वर्णः स्निग्धः स्थिरप्रभः।

स्वभावजं स्थिरं सत्त्वम्+अविकारि विपत्सु+अपि॥114॥

उत्तरोत्तरसुक्षेत्रं वपुः+गर्भादिनीरुजम्।

आयामज्ञानविज्ञानैः+वर्द्धमानं शनैः शुभम्॥115॥

इति सर्वगुणोपेते शरीरे शरदां शतम्।

आयुः+ऐश्वर्यम्+इष्टाः+च सर्वे भावाः प्रतिष्ठिताः॥116॥

त्वग्रक्तादीनि सत्त्वान्तानि+अग्राणि+अष्टौ यथोत्तरम्।

बलप्रमाणज्ञानार्थं साराणि+उक्तानि देहिनाम्॥117॥

सारैः+उपेतः सर्वैः स्यात्+परं गौरवसंयुतः।

सर्वारम्भेषु च+आशावान्+सहिष्णुः सन्मतिः स्थिरः॥118॥
अनुत्सेकम्+अदैन्यं च सुखं दुःखं च सेवते।
सत्ववान्+तप्यमानः+तु राजसः+ न+एव तामसः॥119॥
दानशीलदयासत्यब्रह्मचर्यकृतज्ञताः।
रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणः॥120॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने+अङ्गविभागः+ नाम तृतीयः+अध्यायः॥3॥
चतुर्थः+अध्यायः।
अथ+अतः+ मर्मविभागं शारीरं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सप्तोत्तरं मर्मशतम् तेषाम्+एकादश+आदिशेत्।
पृथक्+सक्थ्नोः+तथा बाह्वोः+त्रीणि कोष्ठे नवः+उरसि॥1॥
पृष्ठे चतुर्दश+ऊर्ध्वं तु जत्रोस्त्रिंशत्+च सप्त च।
मध्ये पादतलस्य+आहुः+अभितः+ मध्यमाङ्गुलिम्॥2॥
तलहृत्+नाम रुजया तत्र विद्धस्य पञ्चता।
अङ्गुष्ठाङ्गुलिमध्यस्थं क्षिप्रम्+आक्षेपमारणम्॥3॥
तस्य+ऊर्ध्वं द्व्यङ्गुले कूर्चः पादभ्रमणकम्पकृत्।
गुल्फसन्धेः+अधः कूर्चशिरः शोफरुजाकरम्॥4॥स
जङ्घाचरणयोः सन्धौ गुल्फः+ रुक्स्तम्भमान्द्यकृत्।
जङ्घान्तरे तु+इन्द्रबस्तिः+मारयति+असृजः क्षयात्॥5॥
जङ्घोर्वोः सङ्गमे जानु खञ्जता तत्र जीवतः।
जानुनः+त्र्यङ्गुलात्+ऊर्ध्वम+आणी+ऊरुस्तम्भशोफकृत्॥6॥
उर्वी+ऊरुमध्ये तद्वेधात्+सक्थिशोषः+अस्रसङ्क्षयात्।
ऊरुमूले लोहिताक्षं हन्ति पक्षम्+असृक्+क्षयात्॥7॥
मुष्कवङ्क्षणयोः+मध्ये विटपं षण्ढताकरम्।
इति सक्थ्नोः+तथा बाह्वोः+मणिबन्धः+अत्र गुल्फवत्॥8॥
कूर्परं जानुवत्+कौण्यं तयोः+विटपवत्+पुनः।
कक्षाक्षमध्ये कक्षाधृक् कुणित्वं तत्र जायते॥9॥
स्थूलान्त्रबद्धः सद्योघ्नः+ विड्वातवमनः+ गुदः।
मूत्राशयः+ धनुर्वक्रः+ बस्तिः+अल्पास्रमांसगः॥10॥
एकाधोवदनः+ मध्ये कट्याः सद्यः+ निहन्ति+असून्।
ऋते+अश्मरीव्रणात्+विद्धः+तत्र+अपि+उभयतः+च सः॥11॥

मूत्रस्रावि+एकतः+ भिन्ने व्रणः+ रोहेत्+च यत्नतः।
देहाम्+अपक्वस्थानानां मध्ये सर्वसिराश्रयः॥12॥
नाभिः सः+अपि हि सद्योघ्नः+ द्वारम्+आमाशयस्य च।
सत्वादिधाम हृदयं स्तनोरःकोष्ठमध्यगम्॥13॥
स्तनरोहितमूलाख्ये द्व्यङ्गुले स्तनयोः+वदेत्।
ऊर्ध्वाधः+अस्रकफापूर्णकोष्ठः+ नश्येत्+तयोः क्रमात्॥14॥
अपस्तम्भौ+उरः पार्श्वे नाड्यौ+अनिलवाहिनी।
रक्तेन पूर्णकोष्ठः+अत्र श्वासात्+कासात्+च नश्यति॥15॥
पृष्ठवंशोरसोः+मध्ये तयोः+एव च पार्श्वयोः।
अधः+अंसकूटयोः+विद्यात्+अपालापाख्यमर्मणी॥16॥
तयोः कोष्ठे+असृजा पूर्णे नश्येत्+यातेन पूयताम्।
पार्श्वयोः पृष्ठवंशस्य श्रोणीकर्णौ प्रति स्थिते॥17॥
वंशाश्रिते स्फिजोः+ऊर्ध्वं कटीकतरुणे स्मृते।
तत्र रक्तक्षयात्+पाण्डुः+हीनरूपः+ विनश्यति॥18॥
पृष्ठवंशं हि+उभयतः+ यौ सन्धी कटिपार्श्वयोः।
जघनस्य बहिर्भागे मर्मणी तौ कुकुन्दरौ॥19॥
चेष्टाहानिः+अधःकाये स्पर्शाज्ञानं च तद्व्यधात्।
पार्श्वान्तरनिबद्धौ यौ+उपरि श्रोणिकर्णयोः॥20॥
आशयत्+छादनौ तौ तु नितम्बौ तरुणास्थिगौ।
अधःशरीरे शोफः+अत्र दौर्बल्यं मरणं ततः॥21॥
पार्श्वान्तरनिबद्धौ च मध्ये जघनपार्श्वयोः।
तिर्यक्+ऊर्ध्वं च निर्दिष्टौ पार्श्वसन्धी तयोः+व्यधात्॥22॥
रक्तपूरितकोष्ठस्य शरीरान्तरसम्भवः।
स्तनमूलार्जवे भागे पृष्ठवंशाश्रये सिरे॥23॥
बृहत्यौ, तत्र विद्धस्य मरणं रक्तसङ्क्षयात्।
बाहुमूलाभिसम्बद्धे पृष्ठवंशस्य पार्श्वयोः॥24॥
अंसयोः फलके बाहुस्वापशोषौ तयोः+व्यधात्।
ग्रीवाम्+उभयतः स्नाव्नी ग्रीवाबाहुशिरोन्तरे॥25॥
स्कन्धांसपीठसम्बन्धौ+अंसौ बाहुक्रियाहरौ।
कण्ठनाडीम्+उभयतः सिरा हनुसमाश्रिताः॥26॥
चतस्रः+तासु नीले द्वे मन्ये द्वे मर्मणी स्मृते।
स्वरप्रणाशवैकृत्यं रसाज्ञानं च तद्व्यधे॥27॥

कण्ठनाडीम्+उभयतः+ जिह्वानासागताः सिराः।
पृथक् चतस्रः+ताः सद्यः+ घ्नन्ति+असून्+मातृकाह्वयाः॥28॥
कृकाटिके शिरोग्रीवासन्धौ, तत्र चलं शिरः।
अधस्तात्+कर्णयोः+निम्ने विधुरे श्रुतिहारिणी॥29॥
फणौ+उयतः+ घ्राणमार्गं श्रोत्रपथानुगौ।
अन्तर्गलस्थितौ वेधात्+गन्धविज्ञानहारिणौ॥30॥
नेत्रयोः+बाह्यतः+अपाङ्गौ भ्रुवोः पुच्छान्तयोः+अधः।
तथा+उपरि भ्रुवोः+निम्नौ+आवर्तौ+आन्ध्यम्+एषु तु॥31॥
अनुकर्णं ललाटान्ते शङ्खौ सद्योविनाशनौ।
कोशान्ते शङ्खयोः+ऊर्ध्वम्+उत्क्षेपौ, स्थपनी पुनः॥32॥
भ्रुवोः+मध्ये, त्रये+अपि+अत्र शल्ये जीवेदनुद्धृते।
स्वयं वा पतिते पाकात्+सद्यः+ नश्यति तु+उद्धृते॥33॥
जिह्वाक्षिनासिकाश्रोत्रखचतुष्टयसङ्गमे।
तालुनि+आस्यानि चत्वारि स्रोतसां, तेषु मर्मसु॥34॥
विद्धः शृङ्गाटकाख्येषु सद्यः+त्यजति जीवितम्।
कपाले सन्धयः, पञ्च सीमन्ताः+तिर्यक्+ऊर्ध्वगाः॥35॥
भ्रमोन्मादमनोनाशैः+तेषु विद्धेषु नश्यति।
आन्तरः+ मस्तकस्य+ऊर्ध्वं सिरासन्धिसमागमः॥36॥
रोमावर्तः+अधिपः+ नाम मर्म सद्यः+ हरति+असून्।
विषमं स्पन्दनं यत्र पीडिते रुक् च मर्म तत्॥37॥
मांसास्थिस्नायुधमनीसिरासन्धिसमागमः।
स्यात्+मर्म+इति च तेन+अत्र सुतरां जीवितं स्थितम्॥38॥
बाहुल्येन तु निर्देशः षोढा+एवं मर्मकल्पना।
प्राणायतनसामान्यादि+ऐक्यं वा मर्मणां मतम्॥39॥
मांसजानि दशेन्द्राख्यतलहृत्स्तनरोहिताः।
शङ्खौ कटीकतरुणे नितम्बौ+अंसयोः फले॥40॥
अस्थ्नि+अष्टौ स्नावमर्माणि त्रयोविंशतिः+आणयः।
कूर्चकूर्चशिरः+अपाङ्गक्षिप्रोत्क्षेपांसबस्तयः॥41॥
गुदापस्तम्भविधुरशृङ्गाटानि नव+आदिशेत्।
मर्माणि धमनीस्थानि सप्तत्रिंशत्+सिराश्रयाः॥42॥
बृहत्यौ मातृका नीले मन्ये कक्षाधरौ फणौ।
विटपे हृदयं नाभिः पार्श्वसन्धी स्तनाधरे॥43॥

अपालापौ स्थपनि+उर्व्यः+चतस्रः+ लोहितानि च।
सन्धौ विंशतिः+आवर्तौ मणिबन्धौ कुकुन्दरौ॥44॥
सीमन्ताः कूर्परौ गुल्फौ कृकाट्यौ जानुनी पतिः।
मांसमर्म गुदः+अन्येषां, स्नाव्नि कक्षाधरौ तथा॥45॥
विटपौ विधुराख्ये च, श्रृङ्गाटानि सिरासु तु।
अपस्तम्भावपाङ्गौ च, धमनीस्थं न तैः स्मृतम्॥46॥
विद्धे+अजस्रम्+असृक्स्रावः+ मांसधावनवत्+तनुः।
पाण्डुत्वम्+इन्द्रियाज्ञानं मरणं च+आशु मांसजे॥47॥
मज्जान्वितः+अच्छः+ विच्छिन्नः स्रावः+ रुक् च+अस्थिमर्मणि।
आयामाक्षेपकस्तम्भाः स्नावजे+अभ्यधिकं रुजा॥48॥
यानस्थानासनाशक्तिः+वैकल्यम्+अथवा+अन्तकः।
रक्तं सशब्दफेनोष्णं धमनीस्थे विचेतसः॥49॥
सिरामर्मव्यधे सान्द्रम्+अजस्रं बह्वसृक्+स्रवेत्।
तत्क्षयात्+तृड्भ्रमश्वासमोहहिध्माभिः+अन्तकः॥50॥
वस्तु शूकैः+इव+आकीर्णं रुढे च कुणिखञ्जता।
बलचेष्टाक्षयः शोषः पर्वशोफः+च सन्धिजे॥51॥
नाभिशङ्खाधिपापानहृच्छृङ्गाटकबस्तयः।
अष्टौ च मातृकाः सद्यः+ निघ्नन्ति+एकान्नविंशतिः॥52॥
सप्ताहः परमः+तेषां कालः कालस्य कर्षणे।
त्रयस्त्रिंशत्+अपस्तम्भतलहृत्पार्श्वसन्धयः॥53॥
कटीतरुणसीमन्तस्तनमूलेन्द्रबस्तयः।
क्षिप्रापालापबृहतीनितम्बस्तनरोहिताः॥54॥
कालान्तरप्राणहरा मासमासार्द्धजीविताः।
उत्क्षेपौ स्थपनी त्रीणि विशल्यघ्नानि, तत्र हि॥55॥
वायुः+मांसवसामज्जमस्तुलुङ्गानि शोषयन्।
शल्यापाये विनिर्गच्छन् श्वासात्+कासात्+च हन्ति+असून्॥56॥
फणौ+आपाङ्गौ विधुरे नीले मन्ये कृकाटिके।
अंसांसफलकावर्तविटपोर्वीकुकुन्दराः॥57॥
सजानुलोहिताक्षाणिकक्षाधृक्कूर्चकूर्पराः।
वैकल्यम्+इति चत्वारि चत्वारिंशत्+च कुर्वते॥58॥
हरन्ति तानि+अपि प्राणान् कदाचित्+अभिघाततः।
अष्टौ कूर्चशिरोगुल्फमणिबन्धा रुजाकराः॥59॥

तेषां विटपकक्षाधृक्+उर्व्यः कूर्चशिरांसि च।
द्वादशाङ्गुलमानानि व्यङ्गुले मणिबन्धने॥60॥
गुल्फौ च स्तनमूले च त्र्यङ्गुलं जानुकूर्परम्।
अपानबस्तिहृन्नाभिनीलाः सीमन्तमातृकाः॥61॥
कूर्चशृङ्गाटम्+अन्याः+च त्रिंशत्+एकेन वर्जिताः।
आत्मपाणितलोन्मानाः शेषाणि+अर्द्धाङ्गुलं वदेत्॥62॥
पञ्चाशत्षट् च मर्माणि, तिलव्रीहिसमानि+अपि।
इष्टानि मर्माणि+अन्येषाम् चतुर्द्धा+उक्ताः सिराः+तु याः॥63॥
तर्पयन्ति वपुः कृत्स्नः ता मर्माणि+आश्रिताः+ततः।
तत्क्षतात्+क्षतजात्यर्थप्रवृत्तेः+धातुसङ्क्षये॥64॥
वृद्धः+चलः+ रुजः+तीव्राः प्रतनोति समीरयन्।
तेजः+तत्+उद्धृतं धत्ते तृष्णाशोषमदभ्रमान्॥65॥
स्विन्नस्रस्तश्लथतनुं हरति+एनं ततः+अन्तकः।
वर्द्धयेत्+सन्धितः+ गात्रं मर्मणि+अभिहते द्रुतम्॥66॥
छेदनात्+सन्धिदेशस्य सङ्कुचन्ति सिरा हि+अतः।
जीवितं प्राणिनां तत्र रक्ते तिष्ठति तिष्ठति॥67॥
सुविक्षतः+अपि+अतः+ जीवेत्+अमर्मणि न मर्मणि।
प्राणघातिनि जीवेत्+तु कश्चित्+वैद्यगुणेन चेत्॥68॥
असमग्राभिघातात्+च सः+अपि वैकल्यम्+अश्नुते।
तस्मात्+क्षारविषाग्न्यादीन् यत्नात्+मर्मसु वर्जयेत्॥69॥
मर्माभिघातः स्वल्पः+अपि प्रायशः+ बाधतेतराम्।
रोगाः+ मर्माश्रयाः+तद्वत्+प्रक्रान्ता यत्नतः+अपि च॥70॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने मर्मविभागः+ नाम चतुर्थः+अध्यायः॥4॥
पञ्चमः+अध्यायः।
अथ+अतः+ विकृतिविज्ञानीयं शारीरं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पुष्पं फलस्य धूमः+अग्नेः+वर्षस्य जलदोदयः।
यथा भविष्यतः+ लिङ्गं रिष्टं मृत्योः+तथा ध्रुवम्॥1॥
(आयुष्मति क्रियाः सर्वाः सफलाः सम्प्रयोजिताः।
भवन्ति भिषजां भूत्यै कृतज्ञः+ इव भूभुजि॥1॥
क्षीणायुषि कृतं कर्म व्यर्थं कृतम्+इव+अधमे।

अयशः+ देहसन्देहं स्वार्थहानिं च यच्छति॥2॥

तर्हि+इदानीं गतासूनां लक्षणं सम्प्रचक्षते।

विकृतिः प्रकृतेः प्राज्ञैः प्रदिष्टा रिष्टसंज्ञया॥3॥)

अरिष्टं न+अस्ति मरणं दृष्टरिष्टं च जीवितम्।

अरिष्टे रिष्टविज्ञानं न च रिष्टे+अपि+अनैपुणात्॥2॥

केचित्+तु तत्+द्विधा+इति+आहुः स्थाय्यस्थायिविभेदतः।

दोषाणाम्+अपि बाहुल्यात्+रिष्टाभासः समुद्भवेत्॥3॥

सः+ दोषाणां शमे शाम्येत्+स्थायी+अवश्यं तु मृत्यवे।

रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु॥4॥

अन्येषु+अपि च भावेषु प्राकृतेषु+अनिमित्ततः।

विकृतिः+या समासेन रिष्टं तत्+इति लक्षयेत्॥5॥

केशरोम निरभ्यङ्गं यस्य+अभ्यक्तम्+इव+ईक्ष्यते।

यस्य+अत्यर्थं चले नेत्रे स्तब्धान्तर्गतनिर्गते॥6॥

जिह्मे विस्तृतसङ्क्षिप्ते सङ्क्षिप्तविनतभ्रुणी।

उद्भ्रान्तदर्शने हीनदर्शने नकुलोपमे॥7॥

कपोताभे अलाताभे स्रुते लुलितपक्ष्मणी।

नासिका+अत्यर्थविवृता संवृता पिटिकाचिता॥8॥

उच्छूना स्फुटिता म्लाना यस्य+ओष्ठौ याति+अधः+अधरः।

ऊर्ध्वं द्वितीयः स्यातां वा पक्वजम्बूनिभौ+उभौ॥9॥

दन्ताः सशर्कराः श्यावाः+ताम्राः पुष्पितपङ्क्तिताः।

सहसा+एव पतेयुः+वा जिह्वा जिह्मा विसर्पिणी॥10॥

शूना शुष्का गुरुः श्यावा लिप्ता सुप्ता सकण्टका।

शिरः शिरोधरा वोढुं पृष्ठं वा भारम्+आत्मनः॥11॥

हनू वा पिण्डम्+आस्यस्थं शक्नुवन्ति न यस्य च।

यस्य+अनिमित्तम्+अङ्गानि गुरूणि+अति लघूनि वा॥12॥

विषदोषात्+विना यस्य खेभ्यः+ रक्तं प्रवर्तते।

उत्सिक्तं मेहनं यस्य वृषणौ+अतिनिःसृतौ॥13॥

अतः+अन्यथा वा यस्य स्यात् सर्वे ते कालचोदिताः।

यस्य+अपूर्वाः सिरालेखा बालेन्द्वाकृतयः+अपि वा॥14॥

ललाटे बस्तिशीर्षे वा षण्मासात्+न स जीवति।

पद्मिनीपत्रवत्+तोयं शरीरे यस्य देहिनः॥15॥

प्लवते प्लवमानस्य षण्मासाः+तस्य जीवितम्।

हरिताभाः सिरा यस्य रोमकूपाः+च संवृताः॥16॥
सः+अम्लाभिलाषी पुरुषः पित्तात्+मरणम्+अश्नुते।
यस्य गोमयचूर्णाभं चूर्णं मूर्ध्नि मुखे+अपि वा॥17॥
सस्नेहं, मूर्ध्नि धूमः+ वा, मासान्तं तस्य जीवितम्।
मूर्ध्नि भ्रुवोः+वा कुर्वन्ति सीमन्तावर्तकाः नवाः॥18॥
मृत्युं स्वस्थस्य षड्रात्रात्+त्रिरात्रात्+आतुरस्य तु।
जिह्वा श्यावा मुखं पूति सव्यम्+अक्षि निमज्जति॥19॥
खगा वा मूर्ध्नि लीयन्ते यस्य तं परिवर्जयेत्।
यस्य स्नातानुलिप्तस्य पूर्वं शुष्यति+उरः+ भृशम्॥20॥
आर्द्रेषु सर्वगात्रेषु सः+अर्धमासं च जीवति।
अकस्मात्+युगपद्गात्रे वर्णौ प्राकृतवैकृतौ॥21॥
तथा+एव+उपचयग्लानिरौक्ष्यस्नेहादि मृत्यवे।
यस्य स्फुटेयुः+अङ्गुल्यः+ न+आकृष्टा न स जीवति॥22॥
क्षवकासादिषु तथा यस्य+अपूर्वः+ ध्वनिः+भवेत्।
ह्रस्वः+ दीर्घः+अति वा+उच्छ्वासः पूतिः सुरभिः+एव वा॥23॥
आप्लुतान्+आप्लुते काये यस्य गन्धः+अतिमानुषः।
मलवस्त्रव्रणादौ वा वर्षान्तं तस्य जीवितम्॥24॥
भजन्ते+अत्यङ्गसौरस्यात्+यं यूकामक्षिकादयः।
त्यजन्ति वा+अतिवैरस्यात्+सः+अपि वर्षं न जीवति॥25॥
सततोष्मसु गात्रेषु शैत्यं यस्य+उपलक्ष्यते।
शीतेषु भृशम्+औष्ण्यं वा स्वेदः स्तम्भः+अपि+अहेतुकः॥26॥
यः+ जातशीतपिटिकः शीताङ्गः+ वा विदह्यते।
उष्णद्वेषी च शीतार्तः सः+ प्रेताधिपगोचरः॥27॥
उरसि+ऊष्मा भवेत्+यस्य जठरे च+अतिशीतता।
भिन्नं पुरीषं तृष्णा च यथा प्रेतः+तथा+एव सः॥28॥
मूत्रं पुरीषं निष्ठ्यूतं शुक्रं वा+अप्सु निमज्जति।
निष्ठ्यूतं बहुवर्णं वा यस्य मासात्+सः+ नश्यति॥29॥
घनीभूतम्+इव+आकाशम्+आकाशम्+इव यः+ घनम्।
अमूर्तम्+इव मूर्तं च मूर्तं च+अमूर्तवत्+स्थितम्॥30॥
तेजस्वी+अतेजः+तद्वत्+च शुक्लं कृष्णमसत्+च सत्।
अनेत्ररोगः+चन्द्रं च बहुरूपमलाञ्छनम्॥31॥
जाग्रत्+रक्षांसि गन्धर्वान् प्रेतान्+अन्यान्+च तत्+विधान्।

रूपं व्याकृति तत्+तत्+च यः पश्यति स नश्यति॥32॥
सप्तर्षीणां समीपस्थां यः+ न पश्यति+अरुन्धतीम्।
ध्रुवम्+आकाशगङ्गां वा सः+ न पश्यति तां समाम्॥33॥
मेघतोयौघनिर्घोषवीणापणववेणुजान्।
शृणोति+अन्यान्+च यः शब्दान्+असतः+ न सतः+अपि वा॥34॥
निष्पीड्य कर्णौ शृणुयात्+न यः+ धुकधुकास्वनम्।
तद्वत्+गन्धरसस्पर्शान् मन्यते यः+ विपर्ययात्॥35॥
सर्वशः+ वा न यः+, यः+च दीपगन्धं न जिघ्रति।
विधिना यस्य दोषाय स्वास्थ्याय+अविधिना रसाः॥36॥
यः पांसुना+एव कीर्णाङ्गः+ यः+अङ्गे घातं न वेत्ति वा।
अन्तरेण तपः+तीव्रं योगं वा विधिपूर्वकम्॥37॥
जानाति+अतीन्द्रियं यः+च तेषां मरणम्+आदिशेत्।
हीनः+ दीनः स्वरः+अव्यक्तः+ यस्य स्यात्+गद्गदः+अपि वा॥38॥
सहसा यः+ विमुह्येत्+वा विवक्षुः+न स जीवति।
स्वरस्य दुर्बलीभावं हानिं च बलवर्णयोः॥39॥
रोगवृद्धिम्+अयुक्त्या च दृष्ट्वा मरणम्+आदिशेत्।
अपस्वरं भाषमाणं प्राप्तं मरणम्+आत्मनः॥40॥
श्रोतारं च+अस्य शब्दस्य दूरतः परिवर्जयेत्।
संस्थानेन प्रमाणेन वर्णेन प्रभया+अपि वा॥41॥
छाया विवर्तते यस्य स्वप्ने+अपि प्रेत एव सः।
आतपादर्शतोयादौ या संस्थानप्रमाणतः॥42॥
छाया+अङ्गात्+सम्भवति+युक्ता प्रतिच्छाया+इति सा पुनः।
वर्णप्रभाश्रया या तु सा छाया+एव शरीरगा॥43॥
भवेत्+यस्य प्रतिच्छाया छिन्ना भिन्ना+अधिका+आकुला।
विशिरा द्विशिरा जिह्मा विकृता यदि वा+अन्यथा॥44॥
तं समाप्तायुषं विद्यात्+न चेत्+लक्ष्यनिमित्तजा।
प्रतिच्छायामयी यस्य न च+अक्ष्णी+ईक्ष्येत कन्यका॥45॥
खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः।
नाभसी निर्मला+आनीला सस्नेहा सप्रभेव च॥46॥
वातात्+रजः+अरुणा श्यावा भस्मरूक्षा हतप्रभा।
विशुद्धरक्ता तु+आग्नेयी दीप्ताभा दर्शनप्रिया॥47॥
शुद्धवैडूर्यविमला सुस्निग्धा तोयजा सुखा।

स्थिरा स्निग्धा घना शुद्धा श्यामा श्वेता च पार्थिवी॥48॥
वायवी रोगमरणक्लेशाय+अन्याः सुखोदयाः।
प्रभा+उक्ता तैजसी सर्वा, सा तु सप्तविधा स्मृताः॥49॥
रक्ता पीता सिता श्यावा हरिता पाण्डुरा+असिता।
तासां याः स्युः+विकासिन्यः स्निग्धाः+च विमलाः+च याः॥50॥
ताः शुभा, मलिना रूक्षाः सङ्क्षिप्ताः+च+अशुभोदयाः।
वर्णम्+आक्रामति छाया प्रभा वर्णप्रकाशिनी॥51॥
आसन्ने लक्ष्यते छाया विकृष्टे भा प्रकाशते।
न+अच्छायः+ न+अप्रभः कश्चित्+विशेषाः+चिह्नयन्ति तु॥52॥
नृणां शुभाशुभोत्पत्तिं काले छायासमाश्रयाः।
निकषन्+इव यः पादौ च्युतांसः परिसर्पति॥53॥
हीयते बलतः शश्वत्+यः+अन्नम्+अश्नन् हितं बहु।
यः+अल्पाशी बहुविण्मूत्रः+ बह्वाशी च+अल्पमूत्रविट्॥54॥
यः+ वा+अल्पाशी कफेन+आर्तः+ दीर्घं श्वसिति चेष्टते।
दीर्घम्+उच्छ्वस्य यः+ ह्रस्वं निःश्वस्य परिताम्यति॥55॥
ह्रस्वं च यः प्रश्वसिति व्याविद्धं स्पन्दते भृशम्।
शिरः+ विक्षिपते कृच्छ्रात्+यः+अञ्चयित्वा प्रपाणिकौ॥56॥
यः+ ललाटात्+स्रुतस्वेदः श्लथसन्धानबन्धनः।
उत्थाप्यमानः सम्मुह्येत्+यः+ बली दुर्बलः+अपि वा॥57॥
उत्तानः+ एव स्वपिति यः पादौ विकरोति च।
शयनासनकुड्यादेः+यः+असत्+एव जिघृक्षति॥58॥
अहास्यहासी सम्मुह्यन् यः+ लेढि दशनच्छदौ।
उत्तरौष्ठं परिलिहन् फूत्कारान्+च करोति यः॥59॥
यम्+अभिद्रवति च्छाया कृष्णा पीता+अरुणा+अपि वा।
भिषेग्भेषजपानान्नगुरुमित्रद्विषः+च ये॥60॥
वशगाः सर्व एव+एते विज्ञेयाः समवर्तिनः।
(ग्रीवाललाटहृदयं यस्य स्विद्यति शीतलम्॥61॥
उष्णः+अपरः प्रदेशः+च शरणं तस्य देवताः।)
[पूर्वरूपाणि सर्वाणि ज्वरादिषु+अतिमात्रया।
यं विशंति विशति+एनं मृत्युः+ज्वरपुरःसरः॥1॥]
यः+अणुज्योतिः+अनेकाग्रः+ दुःच्छायः+ दुर्मनाः सदा॥62॥
बलिं बलिभृतः+ यस्य प्रणीतं न+उपभुञ्जते।

निर्निमित्तं च यः+ मेधां शोभाम्+उपचयं श्रियम्॥63॥
प्राप्नोति+अतः+ वा विभ्रंशं स प्राप्नोति यम्+अक्षयम्।
गुणदोषमयी यस्य स्वस्थस्य व्याधितस्य वा॥64॥
याति+अन्यथात्वं प्रकृतिः षण्मासात्+न स जीवति।
भक्तिः शीलं स्मृतिः+त्यागः+ बुद्धिः+बलम्+अहेतुकम्॥65॥
षड्+एतानि निवर्तन्ते षड्भिः+मासैः+मरिष्यतः।
मत्तवत्+गतिवाक्कम्पमोहा मासात्+मरिष्यतः॥66॥
नश्यति+अजानन् षडहात्+केशलुञ्चनवेदनाम्।
न याति यस्य च+आहारः कण्ठं कण्ठामयात्+ऋते॥67॥
प्रेष्याः प्रतीपतां यान्ति प्रेताकृतिः+उदीर्यते।
यस्य निद्रा भवेत्+नित्या न+एव वा न स जीवति॥68॥
वक्त्रम्+आपूर्यते+अश्रूणां स्विद्यतः+चरणौ भृशम्।
चक्षुः+च+आकुलतां याति यमराज्यं गमिष्यतः॥69॥
यैः पुरा रमते भावैः+अरतिः+तैः+न जीवति।
सहसा जायते यस्य विकारः सर्वलक्षणः॥70॥
निवर्तते वा सहसा, सहसा स विनश्यति।
ज्वरः+ निहन्ति बलवान् गम्भीरः+ दैर्घरात्रिकः॥71॥
सप्रलापभ्रमश्वासः क्षीणं शूनं हतानलम्।
अक्षामं सक्तवचनं रक्ताक्षं हृदि शूलिनम्॥72॥
सशुष्ककासः पूर्वाह्णे यः+अपराह्णे+अपि वा भेवत्।
बलमांसविहीनस्य श्लेष्मकाससमन्वितः॥73॥
रक्तपित्तं भृशं रक्तं कृष्णम्+इन्द्रधनुष्प्रभम्।
ताम्रहारिद्रहरितं रूपं रक्तं प्रदर्शयेत्॥74॥
रोमकूपप्रविसृतं कण्ठास्यहृदये सजत्।
वाससः+अरञ्जनं पूति वेगवत्+च+अति भूरि च॥75॥
वृद्धं पाण्डुज्वरच्छर्दिकासशोफातिसारिणम्।
कासश्वासौ ज्वरच्छर्दितृष्णातीसारशोफिनम्॥76॥
यक्ष्मा पार्श्वरुजानाहरक्तच्छर्द्यंसतापिनम्।
छर्दिः+वेगवती मूत्रशकृद्गन्धिः च सचन्द्रिका॥77॥
सास्रविट्पूयरुक्कासश्वासवती+अनुषङ्गिणी।
तृष्णा+अन्यरोगक्षपितं बहिः+जिह्वं विचेतनम्॥78॥
मदात्ययः+अतिशीतार्तं क्षीणं तैलप्रभाननम्।

अर्शांसि पाणिपन्नाभिगुदमुष्कास्यशोफिनम्॥79॥
हृत्पार्श्वाङ्गरुजाछर्दिपायुपाकज्वरातुरम्।
अतीसारः+ यकृत्पिण्डमांसधावनमेचकैः॥80॥
तुल्यः+तैलघृतक्षीरदधिमज्जवसासवैः।
मस्तुलुङ्गमषीपूयवेसवाराम्बुमाक्षिकैः॥81॥
अतिरक्तासितस्निग्धपूत्यच्छघनवेदनः।
कर्बुरः प्रस्रवन् धातून् निष्पुरीषः+अथवा+अतिविट्॥82॥
तन्तुमान् मक्षिकाक्रान्तः+ राजीमान्+चन्द्रकैः+युतः।
शीर्णपायुवलिं मुक्तनालं पर्वास्थिशूलिनम्॥83॥
स्रस्तपायुं बलक्षीणम्+अन्नम्+एव+उपवेशयन्।
सतृट्श्वासज्वरच्छर्दिदाहानाहप्रवाहिकः॥84॥
अश्मरी शूनवृषणं बद्धमूत्रं रुजार्दितम्।
मेहस्तृड्दाहपिटिकामांसकोथातिसारिणम्॥85॥
पिटिका मर्महृत्पृष्ठस्तनांसगुदमूर्द्धगाः।
पर्वपादकरस्थाः+ वा मन्दोत्साहं प्रमेहिणम्॥86॥
सर्वं च मांससङ्कोथदाहतृष्णामदज्वरैः।
विसर्पमर्मसंरोधहिध्माश्वासभ्रमक्लमैः॥87॥
गुल्मः पृथुपरीणाहः+ घनः कूर्मः+ इव+उन्नतः।
सिरानद्धः+ ज्वरच्छर्दिहिध्माध्मानरुजान्वितः॥88॥
कासपीनसहृल्लासश्वासातीसारशोफवान्।
विण्मूत्रसङ्ग्रहश्वासशोफहिध्माज्वरभ्रमैः॥89॥
मूर्च्छाच्छर्द्यतिसारैः+च जठरं हन्ति दुर्बलम्।
शूनाक्षं कुटिलोपस्थम्+उपक्लिन्नतनुत्वचम्॥90॥
विरेचनहृतानाहम्+आनह्यन्तं पुनः पुनः।
पाण्डुरोगः श्वयथुमान् पीताक्षिनखदर्शनम्॥91॥
तन्द्रादाहारुचिच्छर्दिमूर्च्छाध्मानातिसारवान्।
अनेकोपद्रवयुतः पादाभ्यां प्रसृतः+ नरम्॥92॥
नारीं शोफः+ मुखात्+हन्ति कुक्षिगुह्यात्+उभौ+अपि।
राजीचितः स्रवन्+छर्दिज्वरश्वासातिसारिणम्॥93॥
ज्वरातिसारौ शोफान्ते श्वयथुः+वा तयोः क्षये।
दुर्बलस्य विशेषेण जायन्ते+अन्ताय देहिनः॥94॥
श्वयथुः+यस्य पादस्थः परिस्रस्ते च पिण्डिके।

सीदतः सक्थिनी च+एव तं भिषक् परिवर्जयेत्॥95॥
आननं हस्तपादं च विशेषात्+यस्य शुष्यतः।
शूयेते वा विना देहात्+सः मासात्+याति पञ्चताम्॥96॥
विसर्पः कासवैवर्ण्यज्वरमूर्च्छाङ्गभङ्गवान्।
भ्रमास्यशोफहृल्लासदेहसादातिसारवान्।97॥
कुष्ठं विशीर्यमाणाङ्गं रक्तनेत्रं हतस्वरम्।
मन्दाग्निं जन्तुभिः+जुष्टं हन्ति तृष्णातिसारिणम्॥98॥
वायुः सुप्तत्वचं भुग्नं कम्पशोफरुजातुरम्।
वातास्रं मोहमूर्च्छायमदास्वप्नज्वरान्वितम्॥99॥
शिरोग्रहारुचिश्वाससङ्कोचस्फोटकोथवत्।
शिरोरोगारुचिश्वासमोहविड्भेदतृड्भ्रमैः॥100॥
घ्नन्ति सर्वामयाः क्षीणस्वरधातुबलानलम्।
वातव्याधिः+अपस्मारी कुष्ठी रक्ती+उदरी क्षयी॥101॥
गुल्मी मेही च तान् क्षीणान् विकारे+अल्पे+अपि वर्जयेत्
बलमांसक्षयः+तीव्रः+ रोगवृद्धिः+अरोचकः॥102॥
यस्य+आतुरस्य लक्ष्यन्ते त्रीन् पक्षात्+न स जीवति।
वाताष्ठीला+अतिसंवृद्धा तिष्ठन्ती दारुणा हृदि॥103॥
तृष्णया नु परीतस्य सद्यः+ मुष्णाति जीवितम्।
शैथिल्यं पिण्डिके वायुः+नीत्वा नासां च जिह्मताम्॥104॥
क्षीणस्य+आयम्य मन्ये वा सद्यः+ मुष्णाति जीवितम्।
नाभीगुदान्तरं गत्वा वङ्क्षणौ वा समाश्रयन्॥105॥
गृहीत्वा पायुहृदये क्षीणदेहस्य वा बली।
मलान् बस्तिशिरः+ नाभिं विबद्ध्य जनयन् रुजम्॥106॥
कुर्वन् वङ्क्षणयोः शूलं तृष्णां भिन्नपुरीषताम्।
श्वासं वा जनयन् वायुर्गृहीत्वा गुदवङ्क्षणम्॥107॥
वितत्य पर्शुकाग्राणि गृहीत्वा+उरः+च मारुतः।
स्तिमितस्य+आतताक्षस्य सद्यः+ मुष्णाति जीवितम्॥108॥
सहसा ज्वरसन्तापः+तृष्णा मूर्च्छा बलक्षयः।
विश्लेषणं च सन्धीनां मुमूर्षोः+उपजायते॥109॥
गोसर्गे वदनात्+यस्य स्वेदः प्रच्यवते भृशम्।
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम्॥110॥
प्रवालगुलिकाभासा यस्य गात्रे मसूरिकाः।

उत्पद्य+आशु विनश्यन्ति न चिरात्+सः विनश्यति॥111॥
मसूरविदलप्रख्याः+तथा विद्रुमसन्निभाः।
अन्तर्वक्त्राः किणाभाः+च विस्फोटा देहनाशनाः॥112॥
कामला+अक्ष्णोः+मुखं पूर्णं शङ्खयोः+मुक्तमांसता।
सन्त्रासः+च+उष्णता+अङ्गे च यस्य तं परिवर्जयेत्॥113॥
अकस्मात्+अनुधावत्+च विघृष्टं त्वक्समाश्रयम्।
[चन्दनोशीरमदिराकुणपध्वाङ्क्षगन्धयः।
शैवालकुक्कुटशिखाकुङ्कमालमषीप्रभाः।1॥
अन्तर्दाहा निरूष्माणः प्राणनाशकराः+ व्रणाः।]
यः+ वातजः+ न शूलाय स्यात्+न दाहाय पित्तजः॥114॥
कफजः+ न च पूयाय मर्मजः+च रुजे न यः।
अचूर्णः+चूर्णकीर्णाभः+ यत्र+अकस्मात्+च दृश्यते॥115॥
रूपं शक्तिध्वजादीनां सर्वान्+तान्+वर्जयेत्+व्रणान्।
विण्मूत्रमारुतवहं कृमिणं च भगन्दरम्॥116॥
घट्टयन् जानुना जानु पादौ+उद्यम्य पातयन्।
यः+अपास्यति मुहुः+वक्त्रमातुरः+ न स जीवति॥117॥
दन्तैः+छिन्दन्+नखाग्राणि तैः+च केशान्+तृणानि च।
भूमिं काष्ठेन विलिखन् लोष्टं लोष्टेन ताडयन्॥118॥
हृष्टरोमा सान्द्रमूत्रः शुष्ककासी ज्वरी च यः।
मुहुः+हसन् मुहुः क्ष्वेडन् शय्यां पादेन हन्ति यः॥119॥
मुहुः+छिद्राणि विमृशन्+न+आतुरः+ न स जीवति।
मृत्यवे सहसा+आर्तस्य तिलकव्यङ्गविप्लवः॥120॥
मुखे, दन्तनखे पुष्पं, जठरे विविधाः सिराः।
ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम्॥121॥
शर्म च+अनधिगच्छन्तं बुद्धिमान् परिवर्जयेत्।
विकारा यस्य वर्धन्ते प्रकृतिः परिहीयते॥122॥
सहसा सहसा तस्य मृत्युः+हरति जीवितम्।
यम्+उद्दिश्य+आतुरं वैद्यः सम्पादयितुम्+औषधम्॥123॥
यतमानः+ न शक्नोति दुर्लभं तस्य जीवितम्।
विज्ञातं बहुशः सिद्धं विधिवत्+च+अवचारितम्॥124॥
न सिध्यति+औषधं यस्य न+अस्ति तस्य चिकित्सितम्।
भवेत्+यस्य+औषधे+अन्ने वा कल्प्यमाने विपर्ययः॥125॥

अकस्मात्+वर्णगन्धादेः स्वस्थः+अपि न सः+ जीवति।
निवाते सेन्धनं यस्य ज्योतिः+च+अपि+उपशाम्यति॥126॥
आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा।
अतिमात्रम्+अत्राणि दुर्लभं तस्य जीवितम्॥127॥
यं नरं सहसा रोगः+ दुर्बलं परिमुञ्चति।
संशयप्राप्तमात्रेयः+ जीवितं तस्य मन्यते॥128॥
कथयेत्+न च पृष्टः+अपि दुःश्रवं मरणं भिषक्।
गतासोः+बन्धुमित्राणां न च+इच्छेत्+तं चिकित्सितुम्॥129॥
यमदूतपिशाचाद्यैः+यत्+परासुः+उपास्यते।
घ्नद्भिः+औषधवीर्याणि तस्मात्+तं परिवर्जयेत्॥130॥
आयुर्वेदफलं कृत्स्नं यद्+आयुर्ज्ञे प्रतिष्ठितम्।
रिष्टज्ञानात्+ऋतः+तस्मात्+सर्वदा+एव भवेद्+भिषक्॥131॥
मरणं प्राणिनां दृष्टम्+आयुःपुण्योभयक्षयात्।
तयोः+अपि+अक्षयात्+दृष्टं विषमापरिहारिणाम्॥132॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने विकृतिविज्ञानीयः+ नाम पञ्चमः+अध्यायः॥5॥
षष्ठः+अध्यायः।
अथ+अतः+ दूतादिविज्ञानीयं शारीरं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पाखण्डाश्रमवर्णानां सवर्णाः कर्मसिद्धये।
ते एव विपरीताः स्युः+दूताः कर्मविपत्तये॥1॥
दीनं भीतं द्रुतं त्रस्तं रूक्षामङ्गलवादिनम्।
शस्त्रिणं दण्डिनं षण्ढं मुण्डश्मश्रुजटाधरम्॥2॥
अमङ्गलाह्वयं क्रूरकर्माणं मलिनं स्त्रियम्।
अनेकं व्याधितं व्यङ्गं रक्तमाल्यानुलेपनम्॥3॥
तैलपङ्काङ्कितं जीर्णविवर्णार्द्रैकवाससम्।
खरोष्ट्रमहिषारूढं काष्ठलोष्टादिमर्दिनम्॥4॥
न+अनुगच्छेत्+भिषक्+दूतम्+आह्वयन्तं च दूरतः।
अशस्तचिन्तावचने नग्ने छिन्दति भिन्दति॥5॥
जुह्वाने पावकं पिण्डान् पितृभ्यः+ निर्वपती+अपि।
सुप्ते मुक्तकचे+अभ्यक्ते रुदति+अप्रयते तथा॥6॥
वैद्ये दूता मनुष्याणाम्+आगच्छन्ति मुमूर्षताम्।

विकारसामान्यगुणे देशे काले+अथवा भिषक्॥7॥
दूतम्+अभ्यागतं दृष्ट्वा न+आतुरं तम्+उपाचरेत्।
स्पृशन्तः+ नाभिनासास्यकेशरोमनखद्विजान्॥8॥
गुह्यपृष्ठस्तनग्रीवाजठरानामिकाङ्गुलीः।
कार्पासबुससीसास्थिकपालमुशलोपलम्॥9॥
मार्जनीशूर्पचैलान्तभस्माङ्गारदशातुषान्।
रज्जूपानत्तुलापाशम्+अन्यत्+वा भग्नविच्युतम्॥10॥
तत्+पूर्वदर्शने दूता व्याहरन्ति मरिष्यताम्।
तथा+अर्धरात्रे मध्याह्ने सन्ध्ययोः पर्ववासरे॥11॥
षष्ठीचतुर्थीनवमीराहुकेतूदयादिषु।
भरणीकृत्तिकाश्लेषापूर्वार्द्रापैत्र्यनैर्ऋते॥12॥
यस्मिन्+च दूते ब्रुवति वाक्यम्+आतुरसंश्रयम्।
पश्येत्+निमित्तम्+अशुभं तं च न+अनुव्रजेत्+भिषक्॥13॥
तत्+यथा विकलः प्रेतः प्रेतालङ्कारः+ एव वा।
छिन्नं दग्धं विनष्टं वा तद्वादीनि वचांसि वा॥14॥
रसः+ वा कटुकः+तीव्रः+ गन्धः+ वा कौणपः+ महान्।
स्पर्शः+ वा विपुलः क्रूरः+ यद्वा+अन्यत्+अपि तादृशम्॥15॥
तत्+सर्वम्+अभितः+ वाक्यं वाक्यकाले+अथवा पुनः।
दूतम्+अभ्यागतं दृष्ट्वा न+आतुरं तम्+उपाचरेत्॥16॥
हाहाक्रन्दितम्+उत्क्रुष्टम्+आक्रुष्टं स्खलनं क्षुतम्।
वस्त्रातपत्रपादत्रव्यसनं व्यसनीक्षणम्॥17॥
चैत्यध्वजानां पात्राणां पूर्णानां च निमज्जनम्।
हतानिष्टप्रवादाः+च दूषणं भस्मपांसुभिः॥18॥
पथःच्छेदः+अहिमार्जारगोधासरठवानरैः।
दीप्तां प्रति दिशं वाचः क्रूराणां मृगपक्षिणाम्।19॥
कृष्णधान्यगुडोदश्विल्लवणासवचर्मणाम्।
सर्षपाणां वसातैलतृणपङ्केन्धनस्य च॥20॥
क्लीबक्रूरश्वपाकानां जालवागुरयोः+अपि।
छर्दितस्य पुरीषस्य पूतिदुर्दर्शनस्य च॥21॥
निःसारस्य व्यवायस्य कार्पासादेः+अरेः+अपि।
शयनासनयानानाम्+उत्तानानां तु दर्शनम्॥22॥
न्युनानाम्+इतरेषां च पात्रादीनाम्+अशोभनम्।

पुंसंज्ञाः पक्षिणः+ वामाः स्त्रीसंज्ञा दक्षिणाः शुभाः॥23॥
प्रदक्षिणं खगमृगा यान्तः+, न+एवं श्वजम्बुकाः।
अयुग्माः+च मृगाः शस्ताः शस्ताः नित्यं च दर्शने॥24॥
चाषभासभरद्वाजनकुलच्छागबर्हिणः।
अशुभं सर्वथा+उलूकबिडालसरठेक्षणम्॥25॥
प्रशस्ताः कीर्तने कोलगोधाहिशशजाहकाः।
न दर्शने न विरुते, वानरर्क्षौ+अतः+अन्यथा॥26॥
धनुः+ऐन्द्रं च लालाटम्+अशुभं, शुभम्+अन्यतः।
अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च॥27॥
दध्यक्षतादि निर्गच्छत्+वक्ष्यमाणं च मङ्गलम्।
वैद्यः+ मरिष्यतां वेश्म प्रविशन्+एव पश्यति॥28॥
दूतादि+असाधु दृष्ट्वा+एवं त्यजेत्+आर्तमतः+अन्यथा।
करुणाशुद्धसन्तानः+ यत्नतः+तम्+उपाचरेत्॥29॥
दध्यक्षतेक्षुनिष्पावप्रियङ्गुमधुसर्पिषाम्।
यावकाञ्जनभृङ्गारघण्टादीपसरोरुहाम्॥30॥
दूर्वार्द्रमत्यमांसानां लाजानां फलभक्षयोः।
रत्नेभपूर्णकुम्भानां कन्यायाः स्यन्दनस्य च॥31॥
नरस्य वर्धमानस्य देवतानां नृपस्य च।
शुक्लानं सुमनोवालचामराम्बरवाजिनाम्॥32॥
शङ्खसाधुद्विजोष्णीषतोरणस्वस्तिकस्य च।
भूमेः समुद्धतायाः+च वह्नेः प्रज्वलितस्य च॥33॥
मनोज्ञस्य+अन्नपानस्य पूर्णस्य शकटस्य च।
नृभिः+धेन्वाः सवत्साया वडवायाः स्त्रियाः+ अपि॥34॥
जीवञ्जीवकसारङ्गसारसप्रियवादिनाम्।
हंसानां शतपत्राणां बद्धस्य+एकपशोः+तथा॥35॥
रुचकादर्शसिद्धार्थरोचनानां च दर्शनम्।
गन्धः सुसुरभिः+वर्णः सुशुक्लः+ मधुरः+ रसः॥36॥
गोपतेः+अनुकूलस्य स्वनः+तद्वत्+गवाम्+अपि।
मृगपक्षिनराणां च शोभिनां शोभना गिरः॥37॥
छत्रध्वजपताकानाम्+उत्क्षेपणम्+अभिष्टुतिः।
भेरीमृदङ्गशङ्खानां शब्दाः पुण्याहनिः स्वनाः॥38॥
वेदाध्ययनशब्दाः+च सुखः+ वायुः प्रदक्षिणः।

पथि वेश्मप्रवेशे च विद्यात्+आरोग्यलक्षणम्॥39॥

इति+उक्तं दूतशकुनं स्वप्नान्+ऊर्ध्वं प्रचते।

स्वप्ने मद्यं सह प्रेतैः+यः पिबन् कृष्यते शुना॥40॥

सः+ मर्त्यः+ मृत्युना शीघ्रं ज्वररूपेण नीयते।

रक्तमाल्यवपुर्वस्त्रः+ यः+ हसन् ह्रियते स्त्रिया॥41॥

सः+अस्रपित्तेन महिषश्ववराहोष्ट्रगर्दभैः।

यः प्रयाति दिशं याम्यां मरणं तस्य यक्ष्मणा॥42॥

लता कण्टकिनी वंशः+तालः+ वा हृदि जायते।

यस्य तस्य+आशु गुल्मेन यस्य वह्निम्+अनर्चिषम्॥43॥

जुह्वतः+ घृतसिक्तस्य नग्नस्य+उरसि जायते।

पद्मं सः+ नश्येत्+कुष्ठेन चण्डालैः सह यः पिबेत्॥44।

स्नेहं बहुविधं स्वप्ने सः प्रमेहेण नश्यति।

उन्मादेन जले मज्जेत्+यः+ नृत्यन् राक्षसैः सहः॥45॥

अपस्मारेण यः+ मर्त्यः+ नृत्यन् प्रेतेन नीयते।

यानं खरोष्ट्रमार्जारकपिशार्दूलसूकरैः॥46॥

यस्य प्रेतैः श्रृगालैः+वा स मृत्योः+वर्तते मुखे।

अपूपशष्कुलीः+जग्ध्वा विबुद्धः+तद्विधं वमन्॥47॥

न जीवति अक्षिरोगाय सूर्येन्दुग्रहणेक्षणम्।

सूर्यचन्द्रयोः+ग्रहणदर्शनम्+अक्षिरोगाय।

सूर्याचन्द्रमसोः पातदर्शनं दृग्विनाशनम्॥48॥

मूर्ध्नि वंशलतादीनां सम्भवः+ वयसां तथा।

निलयः+ मुण्डता काकगृध्राद्यैः परिवारणम्॥49॥

तथा प्रेतपिशाचस्त्रीद्रविडान्ध्रगवाशनैः।

सङ्गः+ वेत्रलतावंशतृणकण्टकसङ्कटे॥50॥

श्वभ्रश्मशानशयनं पतनं पांसुभस्मनोः।

मज्जनं जलपङ्कादौ शीघ्रेण स्रोतसा हृतिः॥51॥

नृत्यवादित्रगीतानि रक्तस्रग्वस्त्रधारणम्।

वयोङ्गवृद्धिः+अभ्यङ्गः+ विवाहः श्मश्रुकर्म च॥52॥

पक्वान्नस्नेहमद्याशः प्रच्छर्दनविरेचने।

हिरण्यलोहयोः+लाभः कलिः+बन्धपराजयौ॥53॥

उपानद्युगनाशः+च प्रपातः पादचर्मणोः।

हर्षः+ भृशं प्रकुपितैः पितृभिः+च+अवभर्त्सनम्॥54॥

प्रदीपग्रहनक्षत्रदन्तदैवतचक्षुषाम्।

पतनं वा विनाशः+ वा, भेदनं पर्वतस्य च॥55॥

कानने रक्तकुसुमे पापकर्मनिवेशने।

चितान्धकारसम्बाधे जनन्यां च प्रवेशनम्॥56॥

पातः प्रासादशैलादेः+मत्स्येन ग्रसनं तथा

काषायिणाम्+असौम्यानां नग्नानां दण्डधारिणाम्॥57॥

रक्ताक्षाणां च कृष्णानां दर्शनं जातु नेष्यते।

कृष्णा पापाननाचारा दीर्घकेशनखस्तनी॥58॥

विरागमाल्यवसना स्वप्ने कालनिशा मता।

मनोवहानां पूर्णत्वात्+स्रोतसां प्रबलैः+मलैः॥59॥

दृश्यन्ते दारुणाः स्वप्नाः+ रोगी यैः+याति पञ्चताम्।

अरोगः संशयं प्राप्य कश्चित्+एव विमुच्यते॥60॥

दृष्टः श्रुतः+अनुभूतः+च प्रार्थितः कल्पितः+तथा।

भाविकः+ दोषजः+च+इति स्वप्नः सप्तविधः+ मतः॥61॥

तेषु+आद्या निष्फलाः पञ्च यथा स्वप्रकृतिः+दिवा।

विस्मृतः+ दीर्घह्रस्वः+अति पूर्वरात्रे चिरात्+फलम्॥62॥

दृष्टः करोति तुच्छं च गोसर्गे तत्+अहः+महत्।

निद्रया वा+अनुपहतः प्रतीपैः+वचनैः+तथा॥63॥

याति पापः+अल्पफलतां दानहोमजपादिभिः।

अकल्याणम्+अपि स्वप्नं दृष्ट्वा तत्र+एव यः पुनः॥64॥

पश्येत्+सौम्यं शुभं तस्य शुभम्+एव फलं भवेत्।

देवान् द्विजान् गोवृषभान् जीवतः सुहृदः+ नृपान्॥65॥

साधून् यशस्विनः+ वह्निम्+इद्धं स्वच्छान् जलाशयान्।

कन्याः कुमारकान् गौरान् शुक्लवस्त्रान्+सुतेजसः॥66॥

नराशनं दीप्ततनुं समन्तादत्+रुधिरोक्षितम्।

यः पश्येत्+लभते यः+ वा छत्रादर्शविषामिषम्॥67॥

शुक्लाः सुमनसः+ वस्त्रम्+अमेध्यालेपनं फलम्।

शैलप्रासादसफलवृक्षसिंहनरद्विपान्॥68॥

आरोहेत्+गोश्वयानं च, तरेत्+नदह्रदोदधीन्।

पूर्वोत्तरेण गमनम्+अगम्यागमनं मृतम्॥69॥

सम्बाधात्+निःसृतिः+देवैः पितृभिः+च+अभिनन्दनम्।

रोदनं पतितोत्थानं द्विषतां च+अवमर्दनम्॥70॥

यस्य स्यात्+आयुः+आरोग्यं वित्तं बहु च सः+अश्नुते।

मङ्गलाचारसम्पन्नः परिवारः+तथा+आतुरः॥71॥

श्रद्दधानः+अनुकूलः+च प्रभूतद्रव्यसङ्ग्रहः।

सत्त्वलक्षणसंयोगः+ भक्तिः+वैद्यद्विजातिषु॥72॥

चिकित्सायाम्+अनिर्वेदः+तत्+आरोग्यस्य लक्षणम्।

इति+अत्र जन्ममरणं यतः सम्यक्+उदाहृतम्॥73॥

शरीरस्य ततः स्थानं शारीरम्+इदम्+उच्यते॥73 1/2॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमद्वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां द्वितीये शारीरस्थाने दूतादिविज्ञानीयः+ नाम षष्ठः+अध्यायः॥6॥

समाप्तं च+इदं द्वितीयं शारीरस्थानम्।